Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Stotra sangraha,
Lipi : Devnagari
Language : Sanskrit
Handwritten
Paper (bound)
Size : 8"x6½"
Complete

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

GITA PRESS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[illegible]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(क)

~~श्रीभगवतीमता सामग्री~~

स्तोत्रसंग्रहः

१.	विरूपाक्षपञ्चाशिका	विरूपाक्षनाथकृता	१-८
२.	लघुस्तोत्रम्	(पञ्चस्तव्यां प्रथमम्)	८-१६
३.	चर्चास्तवः	(" द्वितीयम्)	१७-२४
४.	घटस्तवः	(" तृतीयम्)	२५-३०
५.	अम्बास्तवः	(" चतुर्थम्)	३१-४०
६.	सकलजननीस्तोत्रम्	(" पञ्चमम्)	४१-५०
७.	त्रिपुरामहिम्नस्तोत्रम्	श्रीदुर्वासोविरचितम्	५१-६६
८.	श्यामलानवरत्नमाला	शंकराचार्यकृता	६७-६८
९.	कल्याणस्तुतिः	विद्यानन्दसोमसुन्दरकृता	६९-७४
१०.	साम्बपञ्चाशिका	श्रीशाम्बभट्टविरचिता	७५-८८
११.	परमार्थद्वादशिका		८९-९२
१२	परमार्चनत्रिंशिका	श्रीनागभट्टविरचिता	९३-९६
१३.	चित्तसंतोषत्रिंशिका	"	९७-१०५
१४.	भक्तिस्तोत्रम्	अवधूतसिद्धविरचितम्	१०६-१२२
१५.	स्वात्मोपलब्धिशतकम्	सिल्हणकृतम्	१२३-१३६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(१) श्रीधरस्वामिकृता भागवतभावार्थदीपिका

विश्वसर्गविसर्गादिनवलक्षणलक्षितम्। श्रीकृष्णाख्यं परं धाम ... सम्प्रदायानुरोधेन पौर्वापर्यानुसारतः। श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ॥४॥ (पृ. १) ॥१॥

(२) दीपनी

परमहंसपरिव्राजकाचार्यः श्रीश्रीधरयतीन्द्रः। ... अत्र "सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः॥ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्।" इति द्वितीयस्कन्धान्तर्गतदशमाध्यायस्य प्रथमादिसंख्यकश्लोक ---- (अत्र टीकायां सर्वेषामेवार्थाः परिदर्शिताः। स च स्वामिटीकायाः सह (परम्परा) तुलनीयः) ... अत्र सम्प्रदायविदः - सम्प्रदायोऽत्र ब्रह्मोद्गीताद्वैतस्वरूपः। ... (पृ. २) ...। महामहोपाध्यायगोपालभट्टाचार्यकृतव्याख्यालेशाख्यटिप्पणी। ... (पृ. ४) भागवतटीकायां धर्मसिन्धुवादी निबन्धकारः श्रीकाशीनाथोपाध्यायः। ... श्रीवैदिकमन्त्रभागवतः। ... (तदीयनीलकण्ठकृतटीका च) केचित्तु ... दशमस्कन्धस्याध्यायपुरश्चादि द्वादशाध्यायत्रयाणां भागवतत्वं मन्यन्ते। ... तदीय (शुकाष्टक) कैवल्यदीपिकाख्यटीका च ... परमहंसप्रियादिप्राचीनटीकाकाराणां संमाति ... धार्मिकशिरोमणि गोपीचन्द्रसंमतम् ... (पृ. ३)। ... भागवतसन्दर्भस्य तृतीयसन्दर्भे विख्यातनाम्ना द्वैतवादाचार्यः श्रीजीवगोस्वामी। ...

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तात्पर्यदीपिन्याख्यभागवतटीकायां विश्वनाथचक्रवर्ती - स्वल्पतरस्वलक्षणनिरूपणम् (पृ.४)। - - भागवत्पुराणत्वविशेषः - तथैवाहं मयैवासौ स एवाहमिति त्रिधा। भागवत्पुराणत्वं स्यात् सायुज्यप्रापकः ॥ इति वंशीधरभागवतटीकायां (१८।६६) - भक्तिरसायनग्रन्थौ च पूज्यपादमधुसूदनसरस्वतीप्रभृतिभिः। - सुबोधिन्यादिबहुटीकाकृद्भिः कृता तत्रापि प्रतिपादत्वात् तत्र विस्तरभ-(क्रियते) लेशेनैकवाक्यताया परिगृह्यते (पृ.५)। परमहंसपरिव्राजकाचार्य-स्वामिश्रीपतीन्द्रः (पृ.६)। गङ्गाधरकाव्येन देवीपुराणस्य भागवत-शब्देन ग्रहणम् (पृ.७) ॥१॥ (पृ.२-७)

(३) वीरराघवः

मङ्गलाचरणश्लोकः प्रस्तावः ।

श्रीमद्भागवतं पुराणमार्थितं व्याख्यातमिन्द्रं कृतं व्यासार्यैर्यतिराज-मानवदनसारार्हं पुष्पितं पुरे । (पृ.७)। व्याख्या: पूर्वभागोपबृंहणत्वं पञ्चमवेदत्वेन ज्ञातिं श्रीमद्भागवताख्यमिति स्वतं निर्णय प्राधान्येन वेदान्त-परिपालनपूर्णं श्रीमद्भागवतोत्पत्तिपुराणमर्थनिर्णयः - - - कौचिदिदं पुराणं शुककर्तृकमिति वदन्ति - - - यके भागवत संग्रहीतं (भागवतनिर्णयः) (पृ.७) - -
(पृ.७-११)

(४) विजयध्वजः

आनन्दतीर्थविजयतीर्थौ - - तपोः कृतिं स्फुटमुपजीव्य - - (पृ.१२)

अन्ये [illegible] (पृ.१३) - - ॥१॥ (पृ.१३-१४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५) क्रमसन्दर्भः

श्रीभागवतसंदर्भात् श्रीमद्भागवतीयमधीप्य । इत्युक्त भागवतव्याख्या

विरच्यतेऽत्र प्रयत्नतो ॥२॥ ... स्वतन्त्रतया सहस्रादिदैवं श्रीश्रीकृष्ण-

चैतन्यदेवनामानं ... (अत्र षट्सन्दर्भारम्भस्थितो श्लोको ज्ञेय इत्यन्ते ।)

कृष्णचैतन्यपादाश्रितः ... पूर्वं तत्त्वसन्दर्भादिषट्सन्दर्भा निरूपिताः ।

अधुना तु श्रीमद्भागवतक्रमव्याख्यानाय ... सङ्क्षेपः क्रमसन्दर्भोऽयमार-
(पृ.१५)

भ्यते । ... श्रीश्रीधरस्वामि-नारायणतत्पदानुसारेण: ... अत्राद्वैतवादिनः
(अत्र प्रथमं श्रीधरस्वामिव्याख्यानं लिख्यते, ततः स्वकीयं ...)

समादधते ... वैष्णवास्तु तदनुसारतयैवं वदन्ति ... तदवतारिकां

तत्त्वसन्दर्भे द्रष्टव्यम् (पृ.१६) ... यस्यैव श्रीमद्भागवतस्य भाष्यभूतं श्रीहय-

शीर्षपञ्चरात्रे ब्रह्मसूत्रार्थस्तत्र गीतं तन्त्रं तु भागवतानीयं तत्त्व

यच्च साक्षात् श्रीहनुमत्प्रोक्त-भाष्य-नाम भाष्य - [illegible] - विद्वत्कामधेनु-

तत्त्वदीपिका-भावार्थदीपिका-परमहंसप्रिया-शुकहृदयादयो व्याख्याग्रन्था-

स्तेषां मुनिभावभूः इति [illegible] ... [illegible]

... [illegible] ... [illegible]

[illegible] ... [illegible] ... उक्तेनैव

[illegible] जीवन्मुक्तो विवर्तवादोऽपि निरस्तः । (पृ.१७) ... [illegible]

(२०) ... [illegible] ... [illegible] ... (पृ.२०) ... ॥१॥ (पृ.१४-२१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अचिन्त्यभेदाभेदवाद - [illegible]

सांप्रदायिक - गोस्वामी

(६) सुबोधिनी

वैष्णवतन्त्रयन्त्रणे ... तत्र ब्राह्मणाः समवायिनं प्रकृतौ निमित्तकारणमिति केचिदाहुः, विपरीतमन्ये, कर्तृत्वेन चान्ये त्वपरे। (पृ. २२) ---- केचिदुपादानं देहेन्द्रियाणि पार्थिवानि तेजोऽनिलादीन्येवं कल्पयन्ति, केचित्तैजसानि देहेन्द्रियाणि, केचिच्चेतनं कृत्स्नं जडजीवसंबन्धं कल्पयन्ति, जडजीवयोर्भेदं वा साम्यं वा, केचिच्छरीरं भावनाकृतो-ऽध्यासं प्रकल्पयन्ति, कायाद्भिन्नेऽपि स्वेच्छयैव शरीरसंबन्धं वा। सर्वेषां तेषां बुद्धिरेव भ्रान्ता, न ह्यत्रापि शरीरेन्द्रियसंबन्धः। यथा पुनर्बन्धनतो व्यवहारस्तत्वान्तरं नात्र यत्र तं (पृ. २३) ॥१॥ (पृ. २१-२३)

(७) विश्वनाथ चक्रवर्ती

ननु वैष्णवतोऽपि श्रुतिमतं विदाय सन्दर्भतत्त्वानां स्वाम्यनुकम्पितोऽस्य विदुषो भगवत्सन्दर्भिणीम् ॥३॥ (पृ. २३) -- ननु ब्रह्मसाक्षात्कारार्थं ज्ञानयोगे यत्न भक्तिमपेक्षते तथैव (पृ. २४) भागवतमोक्षाकाङ्क्षिणोऽपि भक्तियोगं ज्ञानमपेक्षते ... ॥१॥ (पृ. २३-२६)

(८) सिद्धान्तप्रदीपः

ततो हंसं कुमारं च देवर्षिं निम्बभास्करम्। श्रीभागवतसिद्धान्तप्रदीपोऽयं (पृ. २६) --- मायावादिनां तु (२७) ---- ॥१॥ (पृ. २६-२७)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

(४) मधुसूदनसरस्वती

निदिध्यासनं हि वस्तुस्वरूपापेक्षप्रत्ययानन्तरितशाब्दज्ञानसन्तति-
रूपम् । उपासनं तु वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रं तत् मानस-
क्रियाप्रवाहरूपम् । (पृ. २७) ... द्वैविध्यमुपासनम् (पृ. २७) ... केचित्
हिरण्यगर्भ एव वेदप्रवर्तक आरम्भणं चेत्याहुस्तान्निराकरोति (२८) ...
ईश्वरो जगतो निमित्तकारणमात्रमेवेति तार्किकवैशेषिकयोगपातञ्जलपाशु-
पतादयो व्यवहरन्ति । सांख्यमीमांसकादयस्तु जगन्निमित्तकारणं चे-
तनमेव नेश्वरमुपपादयन्ति, किन्तु प्रधानपरमाण्वाद्येवेतेन रूपेण-
प्रस्थापितवन्तः । (पृ. २८) ... सात्वतास्तु वर्णयन्ति - पञ्चीकृतपञ्च-
महाभूतोपहितं शुद्धचैतन्यं तदभिमानितं विराट्कार्यरूपम् आत्मम्
अनिरुद्ध इति व्याख्यायते । एवमपञ्चीकृतपञ्चमहाभूतोपहितं शुद्ध-
चैतन्यं तदभिमानि हिरण्यगर्भलिङ्गरूपम् अनुमान इति प्रद्युम्न इति
व्याख्यायते । एवं स्थूलसूक्ष्मभूतकारणीभूतं पञ्चप्राणरूपम् अव्याकृतं
तदुपहितं शुद्धचैतन्यं तत्त्वज्ञानोच्छेद्यमायोपकल्पितम् अक्षर इति सङ्कर्षण
इति व्याख्यायते । अनुपहितं तु चैतन्यं सर्वानुस्यूतसन्मात्रं सर्वसाक्षि-
परमानन्दरूपम् अविकल्प इति वासुदेव इति व्याख्यायते । सङ्कर्षण-
प्रद्युम्नानिरुद्धानामपि वासुदेवत्वं वर्तत एव । उपाधिकृतः केवलं नाम-
विशेषः । एतच्च नृसिंहतापनीयोत्तरभागे व्याख्यायते - ओतानुज्ञात्रनु-
ज्ञाविकल्पैः स्थूलसूक्ष्मबीजसाक्षिभिरिति बहुकृत्वो ऽभ्यासेन । अत्र

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च वासुदेवः परमात्मा, सङ्कर्षणो जीवः, प्रद्युम्नो मनः, अनिरुद्धो-
ऽहङ्कार इति पाञ्चरात्रिकमतेऽप्येषां व्यूहानाम्, तत्त्वतोऽभेदम्,
श्रुतिविरोधपरिहारेणोत्पत्त्यसम्भवादिकं निराकरणम्। केचन
परमात्मनोऽनुपाधितो वासुदेवः, कारणोपाधितः सङ्कर्षणः, सूक्ष्मतो-
पाधितः प्रद्युम्नः, स्थूलतोपाधितोऽनिरुद्ध इति व्यूहव्यवस्थामेवा-
दर्शयन्, श्रौतत्वोपपन्नत्वोक्त्या। एवं स्थिते श्रीकण्ठोऽपि ---
अन्ततोऽनिरुद्धप्रभवावतारो नारायणः सतपोऽब्धिशायी भुवनकोशमूल-
भूत इति सविस्तरं ब्रूते एव वर्णनीयं वर्णयन्ति। इतरेषामपि रूपं वक्ष्यते।
विस्तरस्तस्य प्रक्रियायां मोक्षधर्मे नारायणीयोपाख्याने इति। ---
केवलानिरुद्धस्तु केवल वासुदेवावतारः श्रीकृष्ण एव परतया
योज्यन्ते। सङ्कर्षणप्रद्युम्नानिरुद्धानां स्वस्वकारणप्रदेव पृथगवतीर्ण-
त्वाद् वासुदेवावतार एव श्रीकृष्णः। कार्त्स्न्येन परब्रह्मानुप्रवेशो नेत्यपि
तथैव प्रतिपाद्यते। इत्यपि कृष्णस्तु भगवान् स्वयमिति। (पृ. ३०) ---
अस्मान्मीमांसकेरसाधने ऽभिहितः (पृ. ३१) --- ॥११॥ (पृ. २७-३१)

(१०) स्थापितो द्वय तर्कवल्लभस्यापि [illegible] पदार्थाः

भागवततन्त्रे (पृ. ३२) --- सात्वतमतानुसारेण श्रीमत्सद्धर्मसंमतपदार्था
लिख्यन्ते। --- (पृ. ३४) --- नारायणसंहितायाम् (पृ. ३५) --- ॥(११)॥ (पृ. ३१-३५-४०)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

~~श्रीधरी~~ सुबोधिनी

मन्त्रशास्त्रमुपासनाकाण्डः पञ्चरात्रं च। तत्र मन्त्रशास्त्रे देवता स्वाधीना भवति परमेश्वरकृपा। पञ्चरात्रेऽपि मन्त्राधिष्ठानस्वरूपेणैव स्वाधीनता। ... (पृ. ४४) ... ॥२॥

सिद्धान्तदीपः

किञ्चात्र पञ्चरात्रमपि अनेनैव श्लोकेन प्रतिपादयितुं प्रतिज्ञाताः। ...

... ते श्लोकाः पूर्वमार्गेण — "आत्मस्वरूपं तदुपासकस्य च तूपा-फलं भक्तिरसस्ततः परम्। विरोधिनो रूपमथैतदाप्तेर्ज्ञेया इमेऽर्था अपि पञ्च साधुभिः॥" इति (पृ. ४५) ॥२॥

("निगमकल्पतरोः" (१।१।३) इत्यत्र निगमशब्दो वेदार्थकः)।

क्रमसन्दर्भः

श्रीहयशीर्षपञ्चरात्रे पञ्चतत्त्वनिरूपणे — "द्रव्यतत्त्वं शृणु ब्रह्मन् प्रवक्ष्यामि समासतः। ... रसवद् भौतिकं द्रव्यमत्र स्याद्रसरूपकमिति॥ (पृ. ४७) ... ॥३॥

विश्वनाथचक्रवर्ती

ब्रह्मसंहितापि — यस्य प्रभा प्रभवतो .. गोविन्दमादिपुरुषं तमहं भजामीति॥ ... श्रुतिश्च गोपालतापनी ... (पृ. ४९) ... ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दीपनी

विस्तरोऽस्यान्यत्र (अस्माभिः प्रकाशयमाने श्रीभागवत-रहस्यसन्दर्भे) द्रष्टव्यः । ... (पृ.५०) ... ॥४॥

सुबोधिनी

(अस्यश्लोकस्य पौरुषतो द्रष्टव्यः) । सम्मार्ग ... निबन्ध-शास्त्रे ... (पृ.५१) ... ॥४॥

विश्वनाथचक्रवर्ती

... भावार्थदीपिकां ... श्रीधरस्वामिनो (पृ.५१) ॥ ४५

सिद्धान्तदीपः

... विस्तरस्तु वेदान्तकौस्तुभे द्रष्टव्यः ... (विष्णुलोकवर्णनप्रसङ्गः) ... (पृ.५२) ... ॥४॥

(भगवत शब्द की विवेचना पुराणों—१२ श्लोक की टीकाएं द्रष्टव्य)

...... भगवतां पञ्चरात्रोक्तानुष्ठान कारिणाम् — (पृ.६०) विजयध्वजीये ... भगवतं वैष्णवं शास्त्रं तदनुजाते इति भगवताः ... (पृ.६१) सिद्धान्त-अनपेक्षामिति चित्सुखपाठान्तरम् (पृ.७२) क्रमसन्दर्भे चतुर्मुखो हि आनिरुद्धाख्यभगवच्चतुर्थव्यूहनाभिकमल-संभूततपस्तोषितानिरुद्धोपदिष्टभागवतचतुःश्लोकी (पृ.७५) वीरराघ-वाचैः श्रवणादि, प्रेम भक्ति भक्तिरित्यत्रैवेधा । आत्मज्ञानं तत्त्व-ज्ञानं भगवज्ज्ञानं ... (पृ.७८) सुबोधिनी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रवणकीर्तनादिरूपो यो धर्मः स भक्तिरेव साधननाम्नी सैव पाकदशायां प्रेमनाम्नी । ते द्वे अपि भक्तिशब्देनैवोच्येते । (पृ. ७९)
(विश्वनाथ प.)

अत्र "स वै पुंसां परो धर्मः" (भाग. १।२।६) श्लोको द्रष्टव्यः । भाग. १।२।७-८ श्लोकावपि द्रष्टव्यौ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विरूपाक्षपञ्चाशिका

आचार्यविरूपाक्षनाथप्रणीता

त्रिवेन्द्रम् संस्कृतग्रन्थावलि, ९, सन् १९१०

गन्धगजसमररासिकायेन्द्राय प्रकटिताङ्घ्रियुगसमरः ।
निजसिद्धिबीजमस्मै कथयति पृष्टो विरूपाक्षः ॥१॥

विमातिपदमङ्ग सर्वं मम चैतन्यात्मनः शरीरमिदम् ।
शून्यपदादीलावधि दृश्यत्वात् पिण्डवत् सिद्धम् ॥२॥

सम्पन्नोऽस्मि कृशोऽस्मि स्निग्धकरणोऽस्मि मोदमानोऽस्मि ।
प्राणिमि शून्योऽस्मीति च षट्सु पदेष्वस्मिता दृष्टा ॥३॥

विषयशरीरेन्द्रियधीप्राणनिरोधप्रसिद्धपदसित्वाम् ।
इत्थं चितिमारखिलेऽध्वनि धारयतो विश्वदेहत्वम् ॥४॥

उत्क्रम्य विश्वतोऽङ्गात् तद्भागैकतनुनिश्चिताहन्तः ।
कण्ठलुठत्प्राण इव व्यक्तं जीवन्मृतो लोकः ॥५॥

देहेऽस्मितया यद्वज्जडयोरास्फालनं मिथो बाह्वोः ।
इच्छामात्रेणेत्थं गिर्योरपि तद्वशाज्जगति ॥६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बिन्दुं प्राणं शक्तिं मन इन्द्रियमण्डलं शरीरं च ।
आविश्य चेष्टयन्तीं धारय सर्वत्र चाहन्ताम् ॥७॥
ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति ।
एतेऽहन्तायाः किल पर्यायाः साद्भिरुच्यते ॥८॥

॥ विश्वशरीरत्वाविवेचनस्कन्धः प्रथमः ॥

— ॰ —

प्रत्यवमर्शात्मासौ चितिः स्वरसवाहिनी परावाग् या ।
आद्यन्तप्रत्याहृतवर्णगणा सत्यहन्ता सा ॥९॥
स्वपरावभासनक्षम आत्मा विश्वस्य यः प्रकाशोऽसौ ।
अहमिति स एक उक्तोऽहन्ता स्थितिरीदृशी तस्य ॥१०॥
विच्छिन्नाविच्छिन्ने इदमित्यहमित्युभे प्रथे तस्य ।
आभास्याभासकतां स्फुरयन्त्यौ चेत्यचित्पदयोः ॥११॥
एकः स आत्मनासौ नहि क्रमोऽस्तीह देशकालाभ्याम् ।
भेदादिति भिन्नः स क्रमश्चेत्ये भेदाश्रयः खलु सः ॥१२॥
स्वाङ्गे चिद्गगनात्मनि दुग्धोदनिभः स्वशक्तिलहरीणाम् ।
संभेदविभेदाभ्यां सृजति ध्वंसयति चैष जगत् ॥१३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रूपादिपञ्चविषयात्मनि भोग्यहृषीकभोक्तृरूपेऽस्मिन् ।
जगति प्रसरदनन्तस्वशक्तिचक्रा चितिर्भव्या ॥१४॥
सोमरविवह्निलक्षणभोग्येन्द्रियभोक्तृभानपिण्डात्मा ।
बिन्दुर्विमर्शधर्मा षण्णामेकोऽध्वनां प्राणः ॥१५॥
व्यक्तं हि पदार्थात्मकमिदं जगन्नित्यमेव तल्लिङ्गम् ।
शक्त्यात्मकमव्यक्तं तत्रैव पुनर्निमज्जति च ॥१६॥
षोडशधैनं नवधा षोढा भिन्दन्त्यथ त्रिधा च बुधाः ।
आधारभेदलक्ष्यं बहुसिद्धिकरं च सेत्स्यन्तः ॥१७॥
यस्य विमर्शस्य कणः पदमन्त्रार्णात्मकस्त्रिधा शब्दः ।
पदतत्त्वकलात्मार्थो धर्मिण इत्थं प्रकाशस्य ॥१८॥
स्वेन विना मृतपिण्डं स्वावेशशक्तिबलेन जीवयन्नेकः ।
मार्तण्डः परमोऽसौ परनभसि न किं त्वया दृष्टः ॥१९॥
चिद्गगनक्षीरोदं स्वयमिच्छामन्दरेण संक्षोभ्य ।
तच्छक्तिवीचिभिरसौ बुत्थापयतीन्दुमण्डाख्यम् ॥२०॥
शक्तिर्माया प्रकृतिः पृथ्वीति चतुर्विभागमण्डं यत् ।
यश्च विभागोऽस्य पुनर्बहुधा सर्वं स्थितं माधि तत् ॥२१॥

॥ प्रकाशैकात्म्यविवेचनस्कन्धो द्वितीयः ॥

— : —

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अहमेकोऽनस्तमितप्रकाशरूपोऽस्मि तेजसां तमसाम् ।
अन्तः स्थितो ममान्तस्तेजांसि तमांसि चैकस्य ॥२२॥
प्रथमो मध्यम उत्तम इति पुरुषा भेदिनस्त्रयोऽपि मिथः ।
मत्तस्तु महापुरुषात् प्रत्यवमर्शात्मनो न बहिः ॥२३॥
युष्मच्छेषापोहवदहमिति यज्जाति भिन्नमिह रूपम् ।
तदिदं भागविभेदो न त्वहमेकोऽस्मि यन्नित्यम् ॥२४॥
द्यावापृथिवी देशः कालोऽह्नो रात्रिरिति ययोः प्रसरः ।
ते भानतिरोधिकृती शक्ती मे भाववृन्दस्य ॥२५॥
धूमावती तिरोधौ पुष्टौ ह्लादा च भास्वती भाने ।
क्षोभे च परिस्पन्दा व्याप्तौ विभ्वीति शक्तयः पञ्च ॥२६॥
धूमावती पृथिव्यां ह्लादाप्सु शुचौ तु भास्वती प्रथते ।
वायौ स्पन्दा विभ्वी नभसि व्याप्तं जगत् ताभिः ॥२७॥
निजधर्मिणं प्रकाशं स्वरूपयन्ती प्रकाश्यवर्गस्य ।
शक्तिर्विमर्शरूपा शरीरयत्यखिलमस्य मम ॥२८॥
ज्ञातृज्ञानज्ञेयात्मकमखिलं मद्विमर्शवह्निशिखा ।
दग्ध्वा प्रकाशरूपं शुभ्रं भस्मावशेषयति ॥२९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अकठोरमात्मिमर्शज्वालाग्रस्ते तिरोधिमद् भानम् ।
अङ्गारवादिव भस्म प्रथते तत्राणुवर्गस्य ॥३०॥
कात्स्न्येनाविष्टमिवारण्यपुराद्याग्निना मयापि जगत् ।
चित्रमवधूय भेदं ननु गृह्णात्येकरूपत्वम् ॥३१॥
अन्तर्मुखं स्वरूपं ज्ञेयस्य ज्ञानमस्य तु ज्ञाता ।
ज्ञानस्य ज्ञातृतनोर्व्यतिरेकास्यास्त्वहं नान्यः ॥३२॥
अक्रमता मे क्रमिकं ज्ञात्राद्यं सक्रमा क्रमा तु चितिः ।
भक्षद् ज्ञाता ज्ञानं शक्तिरिव त्रितयवद् ज्ञेयम् ॥३३॥
पीतादिषु हि न नीलं तेष्वत्र च भाति कलुषं ज्ञानम् ।
न श्रोत्रादिषु तदपि ज्ञाता तेष्वत्र चानुगतः ॥३४॥
ज्ञातारं मां ज्ञानं शक्तिं त्रितयात्मकं पुनर्ज्ञेयम् ।
अविकल्पं भावयतः सोऽहं सः तत् त्रयं तच्च ॥३५॥
सन्तानान्तरवाहे ज्ञाता व्यावृत्तभासनः क्रमिकः ।
जीवाख्यो मद्योगान्मजत् स्यादक्रमाभासः ॥३६॥
वेद्यं स्वक्रमविद्धं वित्तिमनुप्रविशदङ्गविषयाख्यम् ।
वेदितरि वित्तिमुखतो लीनं तल्लक्षणं भवति ॥३७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्मृत्यनुभवानुसंहितिवशात्तस्तज्जगदिदं तथा तदिदम् ।
स्वैर्यहमाभासंघिता भिन्नं चापोहनेन मिथः ॥३८॥
स्मृतिरनुभवस्य भानं सोऽर्थस्य जौ सहानुसन्धानम् ।
त्रितयमपि मां विनैकं क्रमरहितं न घटते विदुषाम् ॥३९॥
अस्तमितमर्थजातं भात्वा भिन्नमिव मद्गतज्ञानम् ।
मज्ज्ञानैकात्म्येन स्रोत इवाब्धौ स्थितं हि मयि ॥४०॥

॥ विमर्शस्कन्धस्तृतीयः ॥

मत्स्थमपि भुवनवृन्दं बहिरिव मद्भाति मायया भविनाम् ।
अथ विद्यया भवेद् भवपदिनामन्तर्बहिर्द्वेन ॥४१॥
ग्राहकमेवं त्वजडं जडमन्यद् ग्राह्यमस्य यो मनुते ।
मायाविमोहितात्मा बोध्यः सोऽणुर्भवी सद्भिः ॥४२॥
जडतात्मिकामिदन्तामथाजडत्वात्मिकामहन्तां च ।
सामानाधिकरण्यादिदमहमिति बुध्यते द्विपदी ॥४३॥
उद्भविनां केवलया निमग्नमन्तःपदे दृशा भाति ।
मग्नोन्मग्नोभयविधमुन्मनया भाति पुनः पूर्णे ॥४४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रविसोमताडिद्वज्राम्बुदवाडवजलधिगिरिगुहारण्यैः ।
दृढभावितात्मभा वै योगी तत् कर्म निर्वहति ॥४५॥
या देवता यमर्थं करोति तेनार्थिनो दृढं तस्याम् ।
विधृताहङ्कारस्य क्षणेन सोऽर्थः समायाति ॥४६॥
धारणसंग्रहपाकव्यूहाप्रतिघातलक्षणैर्भूतैः ।
स्वस्वनिविष्टाहन्तैर्योगिन इष्टा क्रिया भवति ॥४७॥
इति तन्मात्राकर्मज्ञानेन्द्रियमानसास्मिताधीषु ।
अव्यक्ते पुंसि तथा धृताचितिशक्तिश्च तत्कर्मा ॥४८॥
रागनियत्योः काले विद्याकलयोर्गुहासरस्वत्योः ।
ईशसदाशिवशक्तिषु शिवे च तद्वत् कृताहन्तः ॥४९॥
शुकवामदेवयोरपि कृष्णदधीच्योस्तथा च वैन्यस्य ।
भूतात्मयोगजं खल्वार्षं वैश्वात्म्यमाख्यातम् ॥५०॥
कालाग्निकोटिदीप्तां दाहे पाशोच्चयस्य पटु तृप्तौ ।
अमृतौघवृष्टिमूर्तिं स्मर शक्तिं भव गुरुर्जगतः ॥५१॥
ख्यातिमपूर्णां पूर्णख्यातिसमावेशादर्थतः क्षपय ।
सृज भुवनानि यथेच्छं स्थापय हर तिरय भासय च ॥५२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति बोधितः स इन्द्रो देवेष्वधिकारमलमपोह्य स्वम् ।
आविष्टशाक्तितत्त्वः शिववदपश्यत् स्वमात्मानम् ॥५३॥

॥ विभूतिस्कन्धश्चतुर्थः ॥

॥ विरूपाक्षपञ्चाशिका समाप्तिमगात् ॥

— ० —

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लघुस्तोत्रम्

लघ्वाचार्य (धर्माचार्य) विरचितम्

या मात्रा त्रपुषीलतातनुलसत्तन्तूत्थितिस्पर्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ।
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमां
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥२॥
दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं
येनाकूतवशादपीह वरदे बिन्दुं विनाप्यक्षरम् ।
तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्राम्बुजात् (स्फुजा) ॥३॥
यन्नित्ये तव कामराजमपरं मन्त्राक्षरं निष्कलं
तत्सारस्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ।
आख्यानं प्रतिपर्व सत्यतपसो यत्कीर्तयन्तो द्विजाः
प्रारम्भे प्रणवास्पदं प्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥४॥
ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहःस्थिता
छिन्द्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

~~यत्कित्वे तव कोमल अपरं मत्वाक्षरं~~

यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधै-
स्तार्तीयं तदहं नमामि मनसा बीजमिन्दुप्रभम् ।
अस्त्वौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गोशब्दो गिरि वर्तते सुनियतं योगं विना सिद्धिदः ॥५॥

एकैकं तव देवि (बीजम्) ~~बीज~~ अनघं सव्यञ्जनाव्यञ्जनं
कूटस्थं यदि वा पृथक् क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम् ॥६॥

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे +
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तनयनस्निग्धप्रभालोकिनीं
ये त्वामम्ब न शीलयन्ति मनसा तेषां कवित्वं कुतः ॥७॥

ये त्वां पाण्डुरपुण्डरीकपटलस्पष्टाभिरामप्रभां
सिञ्चन्तीममृतद्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ।
अश्रान्तं विकटस्फुटाक्षरपदा निर्यान्ति वक्त्राम्बुजा-
त्तेषां भारति भारतीसुरसरित्कल्लोललोलोर्मयः ॥८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ये सिन्दूरपरागपुञ्जपिहितां त्वत्तेजसा द्यामिमा-
मुर्वीं चापि विलीनयावकरसप्रस्तारमग्नामिव ।
पश्यन्ति क्षणमप्यनन्यमनसस्तेषामनङ्गज्वर-
क्लान्तास्त्रस्तकुरङ्गदारकदृशो वश्या भवन्ति ध्रुवम् ॥९॥
चञ्चत्काञ्चनकुण्डलाङ्गदधराबद्धकाञ्चिस्रजं
ये त्वां चेतसि तद्गते क्षणमपि ध्यायन्ति कृत्वा स्थिराम् ।
तेषां वेश्मसु विभ्रमादहरहः स्फारीभवन्त्यश्चिरं
माद्यत्कुञ्जरकर्णतालतरलाः स्थैर्यं भजन्ति श्रियः ॥१०॥
आर्भट्या शशिखण्डमण्डितजटाजूटां नृमुण्डस्रजं
बन्धूकप्रसवारुणाम्बरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्गस्तनीं
मध्ये निम्नवलित्रयाङ्किततनुं त्वद्रूपसंवित्तये ॥११॥
जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले
निःशेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद्विद्याधरवृन्दवन्दितपदः श्रीवत्सराजोऽभवद्
देवि त्वच्चरणाम्बुजप्रणतिजः सोऽयं प्रसादोदयः ॥१२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

विधौ

चण्डि त्वच्चरणाम्बुजार्चनकृते बिल्वीदलोल्लुण्ठन-
त्रुट्यत्कण्टककोटिभिः परिचयं येषां न जग्मुः कराः ।
ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्सवत्साङ्कितै-
र्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥१३॥

विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवै-
स्त्वां देवि त्रिपुरे परापरमयीं संतर्प्य पूजाविधौ ।
यां यां प्रार्थयते मनास्थिरधियां येषां त एव ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥१४॥

शब्दानां जननि त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति ध्रुवम् ।
लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥१५॥

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिब्रह्म वर्णास्त्रयः ।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गादिकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥१६॥

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लक्ष्मीं राजकुले जयं रणमुखे क्षेमङ्करीमध्वनि *
क्रव्यादद्विपसर्पभाजि शबरी कान्तारदुर्गे गिरौ ।
भूतप्रेतपिशाचजृम्भकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारांश्च तोयप्लवे ॥१५॥
माया कुण्डलिनी क्रिया मधुमती काली कलामालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि ॥१६॥
आई पल्लवितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः
काद्यैः क्षान्तगतैः स्वरादिभिरथ क्षान्तैश्च तैः सस्वरैः ।
नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परेभ्यो नमः ॥१८॥
बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्यास्त्रिपुरेत्यनन्यमनसा यत्राद्यवृत्तैः स्फुटम् ।
एकद्वित्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरै-
र्मन्त्रोद्धारविधिर्विशेषसहितः सत्सम्प्रदायान्वितः ॥२०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सावद्यं निरवद्यमस्तु यदि वा किं वाऽनया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।
संचिन्त्यापि लघुत्वमात्मनि दृढं संजायमानं हठात्
त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयाऽपि ध्रुवम् ॥२१॥

आनन्दोद्भवकम्पघूर्णनयनं निद्राट्टहासादिकं
वेदव्याकरणावगाहकवितातर्कादिमुक्तिप्रदम् ।
वश्याकर्षपुरप्रवेशन[illegible]गरक्षोभादिसिद्ध्यष्टकं
लब्ध्वाचार्यमिदं करोति सततं सौभाग्यमारोग्यताम् ॥२२॥

गौरि त्र्यम्बकपत्नि पार्वति सति त्रैलोक्यमाने शिवे
शर्वाणि त्रिपुरे भवानि वरदे रुद्राणि कात्यायनि ।
भीमे भैरवि चण्डि सर्ववरदे कालि क्षये शूलिनि
त्वत्पादप्रणतं ह्यनन्यमनसा पर्याकुलं पाहि माम् ॥२३॥

यदि भवति जडात्मा त्रैपुरं मन्त्रराजं
स हि भवति कवीन्द्रः सर्ववादीन्द्रजेता ।
इदमपि कविमातुर्मन्त्रमातङ्गगण्डाः
च्यवति मदजनानां पिच्छलञ्चारदेशे ॥२४॥

मैसूरमुद्रितसौन्दर्यलहरीपुस्तके २२-२४ श्लोका न सन्ति ।

एते श्लोका अन्यत्र न सन्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आईमवल्लरजनीवरबिन्दुनाद-
मेकाक्षरं पदमिदं क्रमुका वदन्ति ।
मन्त्रं च येन भुवनत्रयकारकस्य
सृष्टिस्थितिप्रलयहेतुरचिन्त्यरूपम् ॥ २५ ॥

॥ इति लघ्वाचार्यविरचितं लघुस्तवस्तोत्रं सम्पूर्णम् ॥

"तदुक्तं धर्माचार्यस्तुतौ" (आ. ल. सौभाग्य. पृ. ३३)

इदं तेषु बहुष्वपि पञ्चस्तवीपुस्तकेषु रचयितुः कवेर्नाम न प्राप्यम् किन्तु प्राचीनतोऽयं कश्चन कवीश्वरः, यतः सरस्वतीकण्ठाभरणे पञ्चम-परिच्छेदे अस्यैव तृतीयस्तवकस्य: 'लक्ष्मीवशीकरण-चूर्णसहोदराणि' इत्यादि श्लोको भोजराजेनोद्धृतः। अथ च तृतीयस्तवकस्य एव 'आनन्दमन्थर-पुरन्दरमुक्तमाल्यम्' इत्यादि श्लोकः कुवलयानन्दे संसृष्टि-प्रकरणे। अस्यैव श्लोकस्य 'पादाम्बुजं भवतु मे विजयाय मञ्जु' इत्युत्तरार्धं काव्यप्रकाशे दशमोल्लासे च वर्तते। लघुस्तवनाम्नः प्रथमस्तवकस्य टिप्पणीका अपि समुपलभ्यन्ते। ताश्च सर्वा अपि तन्त्रशास्त्रानुसारिण्य इत्यनुपयुक्ता इत्यस्माभिर्न गृहीताः। तत्रैको नित्यानन्दनामा लघुस्तव-टीकाकारः 'लघुस्तवकर्ता धर्माचार्यः' इति वदति। (काव्यमाला ३ गुच्छक पृ. ४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

*चर्चास्तवः

सौन्दर्यविभ्रमभुवो भुवनाधिपत्य-
सङ्कल्पकल्पतरवस्त्रिपुरे जयन्ति ।
एते कवित्वकुमुदप्रकरावबोध-
पूर्णेन्दवस्त्वयि जगज्जननि प्रणामाः ॥१॥
देवि स्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोऽहमत्र
स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥२॥
मातस्तथापि भवतीं भवतीव्रताप-
विच्छित्तये स्तवमहार्णवकर्णधारः ।
स्तोतुं भवानि स भवच्चरणारविन्द-
भक्तिग्रहः किमपि मां मुखरीकरोति ॥३॥
सूते जगन्ति भवती भवती बिभर्ति
जागर्ति तत्क्षयकृते भवती भवानि ।
मोहं भिनत्ति भवती भवती रुणद्धि
लीलायितं जयति चित्रमिदं भवत्याः ॥४॥

---

*. "चर्चास्तोत्र [illegible]" ([illegible] धरा, पृ. १८७)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यस्मिन् मनागपि नवाम्बुजपत्रगौरि
गौरीप्रसादमधुरं दृशमादधासि ।
तस्मिन्निरन्तरमनङ्गशरावकीर्ण-
सीमन्तिनीनयनसन्ततयः पतन्ति ॥५॥

पृथ्वीभुजोऽप्युदयनप्रभवस्य यस्य
विद्याधरप्रणतिचुम्बितपादपीठः ।
य-का. तच्चक्रवर्तिपदवीप्रणयः स एष
त्वत्पादपङ्कजरजःकणजः प्रसादः ॥६॥

त्वत्पादपङ्कजरजः प्रणिपातपूर्वैः
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ।
क्षीरक्षपाकरधुकूलहिमावदाता
कैरप्यवापि भुवनान्तिनपेऽपि कीर्तिः ॥७॥

कल्पद्रुमप्रसवकल्पितचित्रपूजाँ-
मुद्दीपिताप्रियतमामदरक्तगीतिम् ।
नित्यं भवानि भवतीमुपवीणयन्ति
विद्याधराः कनकशैलगुहागृहेषु ॥८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लक्ष्मीवशीकरणकर्मणि कामिनीनां
आकर्षणव्यतिकरेषु च सिद्धमन्त्रः ।
नीरन्ध्रमोहतिमिरच्छिदुरप्रदीपो
देवि त्वदङ्घ्रिजनितो जयति प्रसादः ॥९॥
देवि त्वदङ्घ्रिनखरत्नभुवो मयूखाः
प्रत्यग्रमौक्तिकरुचो मुदमुद्वहन्ति ।
सेवानतिव्यतिकरे सुरसुन्दरीणां
सीमन्तसीम्नि कुसुमस्तबकायितं यैः ॥१०॥
मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तिदीप्तं
मध्येललाटममरायुधरश्मिचित्रम् ।
हृच्चक्रचुम्बि हुतभुक्कणिकानुकारि
ज्योतिर्यदेतदिदमम्ब तव स्वरूपम् ॥११॥
रूपं तव स्फुरितचन्द्रमरीचिगौर-
मालोकते शिरसि वागधिदैवतं यः ।
निस्सीमसूक्तिरचनामृतनिर्झरस्य
तस्य प्रसादमधुराः प्रसरन्ति वाचः ॥१२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिन्दूरपांसुपटलच्छुरितामिव द्यां
त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् ।
यः पश्यति क्षणमपि त्रिपुरे विहाय
व्रीडां मृडानि सुदृशस्तमनुद्रवन्ति ॥१३॥
मातर्मुहूर्तमपि यः स्मरति स्वरूपं
लाक्षारसप्रसरतन्तुनिभं भवत्याः ।
ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः
प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्यः ॥१४॥
योऽयं चकास्ति गगनार्णवरत्नमिन्दु-
र्योऽयं सुरासुरगुरुः पुरुषः पुराणः ।
यद्वामनर्धमिदमन्धकसूदनस्य
देवि त्वमेव तदिति प्रतिपादयन्ति ॥१५॥
इच्छानुरूपमनुरूपगुणप्रकर्षं
प-का. सङ्कर्षिणि त्वमभिमृश्य सदा बिभर्षि ।
जायेत स त्रिभुवनैकगुरुस्तदानीं
देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥१६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ध्यातासि हैमवति येन हिमांशुरश्मि-
माला मलस्रुतिरकल्मषमानसेन ।
तस्याविलम्बमनवद्यमनन्तकल्पै-
मल्पैर्दिनैः सृजसि सुन्दरि वाग्विलासम् ॥१७॥
आधारमारुतनिरोधवशेन येषां
सिन्दूररञ्जितसरोजगुणानुकारि ।
दीप्तं हृदि स्फुरति देवि वपुस्त्वदीयं
दु-का. ध्यायन्ति तानिह समीहितसिद्धिसार्थाः ॥१८॥
ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति
रूपं तवाम्ब नवयावकपङ्कपिङ्गम् ।
तेषां सदैव कुसुमायुधबाणभिन्न-
वक्षःस्थला मृगदृशो वशगा भवन्ति ॥१९॥
त्वामैन्दवीमिव कलामनुफालदेशं
उद्भासिताम्बरतलामवलोकयन्तः ।
सद्यो भवानि सुधियः कवयो भवन्ति
त्वं भावनाहितधियां कुलकामधेनुः ॥२०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शर्वाणि सर्वजनवन्दितपादपद्मे
पद्मच्छदद्युतिविडम्बितनेत्रलक्ष्मि ।
निष्पापमूर्तिजनमानसराजहंसि
हंसि त्वमापदमनेकविधां जनस्य ॥२१॥

उत्तप्तहेमरुचिरे त्रिपुरे पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगडबन्धनयन्त्रितस्य
त्वत्संस्मृतौ झटिति मे निगडास्त्रुटन्ति ॥२२॥

त्वां पावनीति सुमना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि स्तुवन्ति विजयेति जयेत्युमेति ॥२३॥

उद्दामकामपरमार्थसरोजखण्ड-
चण्डद्युतिद्युतिमपासितषड्विकाराम् ।
मोहद्विपेन्द्रकदनोद्यतबोधसिंह-
लीलागुहां भगवतीं त्रिपुरां नमामि ॥२४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

गणेशबटुकस्तुता रतिसहायकामान्विता
स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता ।
अनङ्गकुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥२५॥

रुद्राणि विद्रुममयीं प्रतिमामिव त्वां
ये चिन्तयन्त्यरुणकान्तिमनन्यरूपाम् ।
तानेत्य पक्ष्मलदृशः प्रसभं भजन्ते
कण्ठावसक्तमृदुबाहुलतास्तरुण्यः ॥२६॥

त्वद्रूपैकनिरूपणप्रणयिताबन्धो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ।
र्तनं-का. त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तितं वाचि मे
कुत्रापि त्वदुपासनव्यसनिता मे देवि मा शाम्यतु ॥२७॥

त्वद्रूपमुल्लसितदाडिमपुष्परक्त-
मुद्भावयेन्मदनदैवतमक्षरं यः ।
तं रूपहीनमपि मन्मथनिर्विशेष-
मालोकयन्त्युरुनितम्बतटास्तरुण्यः ॥२८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मि-
स्कन्दद्विपाननहुताशनवन्दितायै ।
वागीश्वरि त्रिभुवनेश्वरि विश्वमात-
रन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥२९॥

यः स्तोत्रमेतदनुवासरमीश्वरायाः
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्येप्सितं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो मदिरेक्षणानाम् ॥३०॥

॥ इति चर्चास्तवः ॥

"भगवत्पादैरनेडमूकेभ्यो लघुचर्चास्तोत्ररूपं इत्यमस्तोत्र-संयोगमहिम्ना अवाचि" ...." (सौ. टी. लक्ष्मीधरा, पृ. २८१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

घटस्तवः

आनन्दमन्थरपुरन्दरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
*पादाम्बुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमाम्बिकायाः ॥ १ ॥

देवि त्र्यम्बकपत्नि पार्वति सति त्रैलोक्यमातः शिवे
शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि कात्यायनि ।
भीमे भैरवि चण्डि शर्वरिकले कालक्षये शूलिनि
त्वत्पादप्रणताननन्यमनसः पर्याकुलान् पाहि नः ॥ २ ॥

देवि त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्मस्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटाः ।
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥ ३ ॥

---

* धर्माचार्यकृते देवीस्तुतिरूपे पञ्चस्तवीनामककाव्ये तृतीये घटस्तवे प्रथमं पद्यमिदम् (काव्यप्रकाशवामनीटीका, पृ. ७६३) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्च्छा इव
प्राप्तप्रौढमदा इवार्तिविरहग्रस्ता इवार्ता इव ।
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एवाग्रत-
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति तान् सुभ्रुवः ॥४॥
ध्यायन्ति ये क्षणमपि त्रिपुरे हृदि त्वां
लावण्ययौवनधनैरपि विप्रयुक्ताः ।
ते विस्फुरन्ति ललितायतलोचनानां
चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥५॥
एतं किन्तु दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः
किं वाऽमुं निगराम्यनेन सहसा किं वैकतामाश्रये ।
यस्येत्थं विवशो विकल्पललिताकूतेन योषिज्जनः
किं तद्यन्न करोति देवि हृदये यस्य त्वमावर्तसे ॥६॥
विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः
शब्दः शक्तिरिति त्रिलोकजननि त्वय्येव तथ्यास्थितिः ।
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं
त्वद्भक्तानपि न क्षिणोषि च रुषा तद्देवि चित्रं महत् ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं
पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् ।
वर्षन्तीममृतं भवानि भवतीं ध्यायन्ति ये देहिन-
स्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान् दूरतः ॥८॥

पूर्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरैरिव
क्षीराब्धेर्लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया
चित्तान्तर्निहितार्तितापविपदस्ते सम्पदं बिभ्रति ॥९॥

ये संस्मरन्ति तरलां सहसोल्लसन्तीं
त्वां ग्रन्थिपञ्चकमिदं तरुणार्कशोणाम् ।
रागार्णवे बहलरागिणि मज्जयन्तीं
कृत्स्नं जगद्दधति चेतसि तान् मृगाक्ष्यः ॥१०॥

लाक्षारसस्नपितपङ्कजतन्तुतन्वी-
मन्तः स्मरत्यनुदिनं भवतीं भवानि ।
यस्ते स्मरप्रतिममप्रतिमस्वरूपा-
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥११॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्तुमस्त्वां वाचमव्यक्तां हिमकुन्देन्दुरोचिषम् ।
कदम्बमालां बिभ्राणामापादतललम्बिनीम् ॥१२॥

मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं
वर्षन्तीममृतं सरोरुहभुवो वक्त्रेऽपि रन्ध्रेऽपि च ।
आच्छिन्ना च मनोहरा च ललिता चातिप्रसन्नापि च
त्वामेवं स्मरतः स्मरारिदयिते वाक्सर्वतो वल्गति ॥१३॥

ददातीष्टान् भोगान् क्षपयति रिपून् हन्ति विपदो
दहत्याधीन् व्याधीन् शमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं
सकृद् ध्याता देवी किमिव निरवद्यं न कुरुते ॥१४॥

यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय-
त्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति ।
यश्च त्र्यम्बकवल्लभे तव गुणानाकर्णयत्यादरात्
तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां
का का कीर्तिः कुलकमलिनि ख्याप्यते न स्तुतायाम् ।
का का सिद्धिः सुरवरनुते प्राप्यते नार्चितायां
कं कं योगं त्वयि न चिनुते चित्तमालम्बितायाम् ॥१६॥

ये देवि दुर्धरकृतान्तमुखान्तरस्था:
ये कालि कालघनपाशनितान्तबद्धाः ।
ये चण्डि चण्डगुरुकल्मषसिन्धुमग्नाः
स्तान्‌ पाहि मोचयसि तारयसि स्मृतैव ॥१७॥

लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥१८॥

रे मूढाः किमयं वृथैव तपसा कायः परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियन्ते गृहाः ।
भक्तिश्चेदविनाशिनी भगवतीपादद्वयी सेव्यताम्
उन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मीः पुरो धावति ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

याचे न कञ्चन न कञ्चन वञ्चयामि
सेवे न कञ्चन निरस्तसमस्तदैन्यः।
श्लक्ष्णं वसे मधुरमाद्मि भजे वरस्त्री-
र्देवी हृदि स्फुरति मे कुलकामधेनुः॥२०॥
नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम्।
भवानीं भवसन्तापनिर्वापणसुधानदीम्॥२१॥
॥ इति चर्चास्तवः॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अम्बास्तवः❀

यामामनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यविदो वदन्ति ।
तामर्धपल्लवितशङ्करस्वरूपमुद्रां
देवीमनन्यशरणः शरणं प्रपद्ये ॥१॥

अम्ब स्तवेषु तव तावदकर्तृकाणि
कुण्ठीभवन्ति वचसामपि गुम्फनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यनिघ्नहृदयां भवतीं धिनोतु ॥२॥

व्योमेति बिन्दुरिति नाद इतीन्दुलेखा-
रूपेति वाग्भवतनूरिति मातृकेति ।
निःस्यन्दमानसुखबोधसुधास्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम् ॥३॥

❀ "कालिदासो महाकविः सर्वमङ्गलाप्रसादलब्धसर्वविद्याधिपत्यवतामेव सर्वमङ्गलां त्रिंशच्छ्लोकैरभिष्टौति" (सरस्वतीभ० २१९२२, पृ० ३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आविर्भवत्पुलकसन्ततिभिः शरीरैः
निःस्यन्दमानसलिलैर्नयनैश्च नित्यम् ।
वाग्भिश्च गद्गदपदाभिरुपासते ये
पादौ तवाम्ब भुवनेषु त एव धन्याः ॥४॥
वक्त्रं यदुद्यतमभिष्टुतये भवत्या-
स्तुभ्यं नमो यदपि देवि शिरः करोति ।
चेतश्च यत्त्वयि परायणमम्ब तानि
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥५॥
मूलालवालकुहरादुदिता भवानि
निर्भिद्य षट्सरसिजानि तटिल्लतेव ।
भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दु-
निःस्यन्दमानपरमामृततोयरूपा ॥६॥
दग्धं यदा मदनमेकमनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयाञ्चकार ।
धत्ते तदाप्रभृति देवि ललाटनेत्रं
लिः-का. सत्यं ह्रियेव मुकुलीकृतमिन्दुमौलिः ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अज्ञातसम्भवमनाकलितान्ववायं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवान्याः
शम्भुं क एव बुबुधे गिरिराजकन्ये ॥ ८ ॥

चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च नटनं च परेतभूमौ ।
वेतालसंहतिपरिग्रहता च शम्भोः
शोभां बिभर्ति गिरिजे तव साहचर्यात् ॥ ९ ॥

कल्पोपसंहरणकेलिषु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
आलोकनेन तव कोमलितानि मात-
र्लास्यात्मना परिणमन्ति जगद्विभूत्यै ॥ १० ॥

जन्तोरपश्चिमतनोः सति कर्मसाम्ये
निश्शेषपाशपटलच्छिदुरां निमेषात् ।
कल्याणि देशिककटाक्षसमाश्रयेण
कारुण्यतो भवति शाम्भववेधदीक्षा ॥ ११ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुक्ताविभूषणवती नवविद्रुमाभा
यच्चेतसि स्फुरसि तारकितेव सन्ध्या ।
एकः स एव भुवनत्रयसुन्दरीणां
कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥१२॥
ये भावयन्त्यमृतवाहिभिरंशुजालै-
राप्याय्यमानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरलङ्घनीयां
ब्रह्मादिभिः सुरवरैरपि कालकक्षाम् ॥१३॥
यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ।
पद्मासनां च हृदये भवतीमुपास्ते
मातः स विश्वकवितार्किकचक्रवर्ती ॥१४॥
बर्हावतंसयुतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवदनां सुकुमारहस्तां
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अर्थेन किं नवलताललितेन मुग्धे
क्रीतं विभोः परुषमर्थमिदं त्वयेति ।
आलिङ्गनस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि जडीभवन्ति ॥१६॥

ब्रह्माण्डबुद्बुदकदम्बकसङ्कुलोऽयं
मायोदधिर्विविधतत्त्वतरङ्गमालः ।
आश्चर्यमम्ब झटिति प्रलयं प्रयाति
त्वद्ध्यानसन्ततिमहावडवामुखाग्नौ ॥१७॥

दाक्षायणीति कुटिलेति कुहारिणीति
कात्यायनीति कमलेति कलावतीति ।
एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव ॥१८॥

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निस्सारमेव निखिलं त्वदृते यदि स्यात् ॥२०॥

ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं
सूते पयांसि यदहिर्धरणीं च धत्ते ।
यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब तव केवलमाज्ञयैव ॥२१॥

सङ्कोचमिच्छसि यदा गिरिजे तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनाः सुकरा भवन्ति ॥२२॥

भोगाय देवि भवतीं कृतिनः प्रणम्य
भ्रूकिङ्करीकृतसरोजगृहासहस्राः ।
चिन्तामणिप्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हर्तुं त्वमेव भवसि त्वदधीनधीरो
संसारतापमखिलं दयया पशूनाम् ।
वैकर्तनीकिरणसंहतिरेव शक्ता
धर्मं निजं शमयितुं निजयैव वृष्ट्या ॥२४॥

शक्तिः शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।
ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥२५॥

भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्याऽनले मरुति शान्तिरतीतशान्तिः ।
व्योम्नीति याः किल कलाः कलयन्ति विश्वं
तासां हि दूरतरमम्ब पदं त्वदीयम् ॥२६॥

यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ।
तावद्विकल्पजटिलाः कुटिलप्रकारा-
स्तर्कग्रहाः समयिनां प्रलयं न यान्ति ॥२७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पद्य-का. निर्देवयानपितृयानविहारमेके
कृत्वा मनः करणमण्डलसार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥ २८॥
स्थूलासु मूर्तिषु महीप्रमुखासु शम्भोः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सि-का. सापि स्तुता किल मयेति तितिक्षितव्यम् ॥२९॥
कालाग्निकोटिरुचिमम्ब षडध्वशुद्धौ
आप्लावनेषु भवतीममृतौघवर्षिम् ।
श्यामां घनस्तनतटां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ॥ ३०॥
विद्यां परां कतिचिदम्बरमम्ब केचिद्
आनन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनामः
साक्षादपारकरुणां गुरुमूर्तिमेव ॥३१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभारक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः
सकलजननि मातः सन्ततं सन्निधत्ताम् ॥३२॥

॥ इत्यम्बास्तवः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सकलजननीस्तोत्रम्*

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः ।
जगन्मातर्जन्मज्वरभयतमः कौमुदि वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥१॥

वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतितुलितनीलोत्पलरुचे ।
शिवस्फाराधाय स्तनभरविनम्राय सततं
नमस्तस्मै कस्मैचन भवतु मुग्धाय महसे ॥२॥

अनाद्यन्ताभेदप्रणयरसिकाऽपि प्रणयिनी
शिवस्याशीर्यत्त्वं परिणयविधौ देवि गृहिणी ।
सवित्री भूतानामपि यदुदभूश्शैलतनया
तदेतत्संसारप्रणयनमहानाटकसुखम् ॥३॥

---

* "कालिदासभगवत्पादैः कुलसमयमतभेदप्रतिपादकश्लोकेन सकलजननी-स्तोत्रे ....." (सौ. ल. टी. लक्ष्मीधरा, पृ. ३०५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भुवन्त्येके तत्त्वं भगवति सदन्ये विदुरसत्

परे मातः प्राहुस्तव सदसदन्ये सुकवयः ।

परे नैतत्सर्वं समभिदधते देवि सुधियः

स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ॥४॥

लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिका -

नीलोत्पल-का. मुदञ्चद्घर्माम्भः कणगुणितवक्त्राम्बुजरुचम् ।

शिवं पार्थत्राणप्रवणमृगयाकारगुणितं

शिवामन्वग्यान्तीं शबरमहमन्वेमि शबरीम् ॥५॥

मियः केशाकेशिप्रथननिधनास्तर्कघटना

बहुश्रद्धाभक्तिप्रणयविषयाः शास्त्रविधयः ।

प्रसीद प्रत्यक्षीभव गिरिसुते देहि शरणं

निरालम्बं चेतः परिलुठति पारिप्लवमिदम् ॥६॥

शुनां वा वह्नेर्वा खगपरिषदो वा पदशनं

कदा केन क्वेति क्वचिदपि न कश्चित्कलयति ।

अमुष्मिन् विश्वासं विजहीहि ममाद्याय वपुषि

प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तटित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा ।
किमप्यष्टात्रिंशत्किरणसकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥८॥

भगपुरा - का. चतुष्पत्रान्तःषड्दलपुटभगान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियताभद्युतियुते ।
षडस्रं भित्त्वादौ दशदलमथ द्वादशदलं
कलास्रं च द्व्यस्रं गतवति नमस्ते गिरिसुते ॥९॥

कुले केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः
परे तत्सम्भेदं समभिदधते कौलमपरे ।
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे
महामाये तत्त्वं तव कथममी निश्चिनुमहे ॥१०॥

षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् ।
वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः
कुचाभ्यामानम्रस्तव पुरुषकारो विजयते ॥११॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं
प्रविश्यैतद् द्वन्द्वं रविशशिसमाख्यं कवलयन् ।
प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात्ते जन्तुः शिवमकुलमम्ब प्रविशति ॥१२॥

मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेदस्य क्वचन तव मातः करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥१३॥

प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां
समुन्मीलन्मुक्ताफलबहुलनेपथ्यसुभगाम् ।
स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां
सकृद् ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥१४॥

षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलै-
र्लसन्मुद्राफेनैर्बहुविधचलद्दैवतझषैः ।
क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदी
भवानि प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महीपाथोवह्निश्वसनवियदात्मेन्दुरविभि-
र्वपुर्भिर्ग्रस्तांशैरपि तव कियानम्ब महिमा ।
अमून्यालोकयन्ते भगवति न कुत्राप्यणुतमा-
मवस्थां प्रज्ञानि त्वयि तु परमव्योमवपुषि ॥१६॥
कलां मायां प्रज्ञां समयमनुभूतिं समरसं
गुरुं पारम्पर्यं विनयमुपदेशं शिवकलाम् ।
लि-का. प्रमाणं निर्वाणं प्रकृतिमभिभूतिं परगुहां
विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥१७॥
प्रलीने शब्दौघे तदनु विरते बिन्दुविभवे
ततस्तत्त्वे चाष्टध्वनिवपुरुपाधिन्युपगते ।
श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्रगहनां
स्वसंवित्तिं योगी रसयति शिवाख्यां परतनुम् ॥१८॥
परानन्दाकारां निरवधिशिवैश्वर्यवपुषं
निराकारां ज्ञानप्रकृतिमपरिच्छिन्नकरुणाम् ।
सवित्रीं लोकानां निरतिशयधामास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जगत्काये कृत्वा तदपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तदपि वियदाख्ये च गहने ।
तदेतद्ज्ञानाख्ये तदपि परमानन्दगहने
महाव्योमाकारे त्वदनुभवशीलो विजयते ॥२०॥

विधे वेद्ये विद्ये विविधसमये वेदगुलिके
विचित्रे विश्वाद्ये विनयसुलभे वेदजननि ।
शिवज्ञे शूलस्थे शिवपदवदान्ये शिवनिधे
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥२१॥

विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ।
अलञ्चक्रे कण्ठं यदपि गरलेनाम्ब गिरिशः
शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥२२॥

विरिञ्चाख्या मातः सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम् ।
भवन्ती नादाख्या विहरसि च पाशौघदलनी
त्वमेवैकाऽनेका भवसि कृतिभेदैर्गिरिसुते ॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुनीनां चेतोभिः प्रमृदितकषायैरपि मनाक्
अशक्यं संस्प्रष्टुं चकितचकितैरम्ब सततम् ।
श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोमलतरे
कथं ते विन्दन्ते पदकिसलये पार्वति पदम् ॥२४॥

तटिद्वल्लीं नित्याममृतसरितं पाररहितां
मलोत्तीर्णां ज्योत्स्नां प्रकृतिमगुणग्रन्थिगहनाम् ।
गिरां दूरां विद्यामविनतकुचां विश्वजननी-
मपर्यन्तां लक्ष्मीमभिदधाति सन्तो भगवतीम् ॥२५॥

शरीरं क्षित्यम्भःप्रभृतिरचितं केवलमिदं
सुखं दुःखं चायं कलयति पुमांश्चेतन इति ।
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीराहङ्कारं तव समयबाह्यो गिरिसुते ॥२६॥

पिता माता भ्राता सुहृदनुचरः सद्म गृहिणी
वपुः क्षेत्रं मित्रं धनमपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने मातर्भव करुणया सन्निधिकरी ॥२७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः
सदोषं तं हित्वा तदनु गिरिराजस्य दुहिता ।
अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती
वाहा-क्रा. विहायाज्जायाऽसीत्यहह चरितं वेत्ति तव कः ॥ २८॥
कणास्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः
परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका ।
शिवादि क्षित्यन्तं त्रिवलयतनोः सर्वमुदरे
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥२९॥
पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं ~~ब्रह्म~~ स्थूलं सूक्ष्मं सकलमकुलं गुह्यमगुहम् ।
दवीयो नेदीयः सदसदिति विश्वं भगवती
ख्यां-क्रा. सदा पश्यन्त्योरख्या वहसि भुवनक्षोभजननीम् ॥३०॥
प्रविश्य त्वन्मार्गं सहजदयया देशिकदृशा
षडध्वध्वान्तौघाच्छिदुरगणनातीतकरुणाम् ।
परामादाकारां सपदि शिवयन्ती शिवतनुं
* स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥३१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मयूखाः पुष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलाः प्रतिहतमहिम्नीव पृषतः ।
उदेत्योदेत्याम्ब त्वयि सह निजैः सात्त्विकगुणैः
भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥ ३२॥
विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा दिनकरः
निलः - ला. स्वभावो जैनेन्द्रः सुगतमुनिराकाशमलिनः ।
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां
विकल्पैरेभिस्त्वामभिदधति सन्तो भगवतीम् ॥३३॥
शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥३४॥
त्वया यो जानीते रचयति भवत्यैव सततं
त्वयैवेच्छत्यम्ब त्वमसि निखिला यस्य तनवः ।
गतो साम्यं शम्भोर्वहति परमं व्योम भवती
तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ॥३५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

असंख्यैः प्राचीनैर्जननि जननैः कर्मविलयात्
कृते जन्मन्यन्ते गुरुवपुषमासाद्य गिरिशम् ।
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवान्
नयेयं त्वद्भूजास्तुतिविरचनैरेव दिवसान् ॥३६॥

यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या
योनिस्तस्याः प्रथितमुदरे यत्तदोङ्काररूपीठम् ।
तस्मिन्नन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां
श्यामाकारां सकलजननीं सन्ततं भावयामि ॥३७॥

भुवि पयसि कृशानौ मारुते खे शशाङ्के
सवितरि यजमानेऽप्यष्टधा शक्तिरेका ।
वहति कुचभराभ्यां याऽवनम्राऽपि विश्वं
सकलजननि सा त्वं पाहि मामित्यवश्यम् ॥३८॥

॥ इति* पञ्चस्तव्यां सकलजननीस्तवः ॥

---

* एषा पञ्चस्तवी मैसूरनगरतः सौन्दर्यलहरीटीकया सह, काव्य-मालायां च तृतीये गुच्छके प्रकाशितो ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रिपुरामहिम्नस्तोत्रम्

क्रोधभट्टारकाख्यदुर्वासोविरचितम्

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥१॥
आदिक्षान्तसमस्तवर्णसुमणिप्रोते वितानप्रभे
ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्षोन्नते ।
ब्रह्माण्डाब्जमहासने जननि ते मूर्तिं भजे चिन्मयीं
सौषुम्णायतपीतपङ्कजमहामध्यत्रिकोणास्थिताम् ॥२॥
वन्दे वाग्भवमैन्दवात्मसदृशं वेदादिविद्यागिरो
भाषा देशसमुद्भवाः पशुगताश्छन्दांसि सप्त स्वरान् ।
तालान् पञ्च महाध्वनीन् प्रकटयत्यात्मप्रसारेण य-
त्तद्बीजं पदवाक्यमानजनकं श्रीमातृके ते परम् ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमा नाप्नोति शश्वद्विना
यद्बीजं व्यवहारजालमखिलं नास्त्येव मातस्तव ।
तज्जाप्यस्मरणप्रसक्तसुमतिः सर्वज्ञतां प्राप्य कः
शब्दब्रह्मनिवासभूतवदनो नेन्द्रादिभिः स्पर्धते ॥४॥

मात्रा यात्र विराजतेऽतिविशदा तामद्य मातृकां
शक्तिं कुण्डलिनीं चतुर्विधतनुं यस्तत्त्वविन्मन्यते ।
सोऽविद्याखिलजन्मकर्मदुरितारण्यं प्रबोधाग्निना
भस्मीकृत्य विकल्पजालमखिलं मातः पदं तद्व्रजेत् ॥५॥

तत्ते मध्यमबीजमम्ब कलयाम्यादित्यवर्णं क्रिया-
ज्ञानेच्छादिमनन्तशक्तिविभवव्यक्तिं व्यनक्ति स्फुटम् ।
उत्पत्तिस्थितिकल्पकल्पिततनु स्वात्मप्रसारेण यत्
कार्यं ब्रह्महरीश्वरादिविबुधैः कामं क्रियायोजितैः ॥६॥

कामान् कारणतां गतानगणितान् कार्यैरनेकैर्मही-
मुख्यैः सर्वमनोगतानधिगतान् मानैरनेकैः स्फुटम् ।
कामक्रोधसुलोभमोहमदमात्सर्यारिषट्कं च यद्
बीजं भ्राजयति प्रणौमि तदहं ते साधु कामेश्वरि ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यज्ज्ञानाखिलकामपूरणचणस्वात्मप्रभावं महा-
जाड्यध्वान्तनिवारणैकतरणिज्योतिः प्रबोधप्रदम् ।
यद्देवेषु च गीयते श्रुतिमुखं मात्रात्रयेणोमिति
श्रीविद्ये तव सर्वराजवशकृत्तत्कामराजं भजे ॥८॥
यत्ते देवि तृतीयबीजमनलज्वालावलीसंनिभं
सर्वाधारतुरीयबीजमपरं ब्रह्माभिधाशब्दितम् ।
मूर्धन्यान्तविसर्गभूषितमहौकारात्मकं तत्परं
संविद्रूपमनन्यतुल्यमहिम स्वान्ते मम द्योतताम् ॥९॥
सर्वं सर्वत एव सर्गसमये कार्येन्द्रियाण्यन्तरा
तत्त्वादिव्यहृषीककर्मभिरियं संव्यश्नुवाना परा ।
वागर्थव्यवहारकारणतनुः शक्तिर्जगद्व्यापिनी
यद्बीजात्मकतां गता तव शिवे तन्नौमि बीजं परम् ॥१०॥
अग्नीन्दुद्युमणिप्रभाञ्जनधरानीरान्तरस्थायिनी
शक्तिर्ब्रह्महरीशवासवमुखामर्त्यासुरात्मस्थिता ।
सृष्टस्थावरजङ्गमार्पितमहाचैतन्यरूपा च या
यद्बीजस्मरणेन सैव भवती प्रादुर्भवत्याम्बिके ॥११॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वात्मश्रीकिजीनाजाविष्णुमघवश्रीपूरणैकव्रतं
यद्विद्याकविताविताललहरीकल्लोलिनीदीपकम् ।
बीजं यात्त्रिगुणप्रवृत्तिजनकं ब्रह्मेति यद्योगिनः
शान्ताः सत्यमुपासते तदिह ते चित्ते दधे श्रीपरे ॥१२॥
एकैकं तव मातृके परतरं संयोगि वायोगि वा
विद्यादिप्रकटप्रभावजनकं जाड्यान्धकारापहम् ।
यन्निष्ठाश्च महोत्पलासनमहाविष्णुप्रहर्त्रादयो
देवाः स्वेषु विधिष्वनन्यमहिमस्फूर्तिं दधत्येव तत् ॥१३॥
इत्थं त्रीण्यपि मूलवाग्भवमहाश्रीकामराजस्फुर-
च्छक्त्याख्यानि चतुःश्रुति प्रकटितान्युत्कृष्टकूटानि ते ।
भूतर्तुश्रुतिसंख्यवर्णविदितान्यारक्तकान्ते ।शिवे
यो जानाति स एव सर्वजगतां सृष्टिस्थितिध्वंसकृत् ॥१४॥
नित्यं यस्तव मातृकाक्षरमयीं सौभाग्यविद्यां जपेत्
संपूज्याखिलचक्रराजनिलयां सायन्तनाग्निप्रभाम् ।
कामाख्यं शिवनामतत्त्वमुभयं व्याप्यात्मना सर्वतो
दीव्यन्तीमिह तस्य सिद्धिरचिरात्स्यात्तत्स्वरूपैकता ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काव्यैः पाण्ठितैः किमल्पविदुषां जोघुष्यमाणैः पुनः
किं तैर्व्याकरणैर्विबोधिततया किं वाभिधानाश्रया ।
एतैरम्ब न बोभवीति सुकविस्तावन्न व श्रीमतो
यावन्नानुसरीसरीति सरणिं पादाब्जयोः पावनीम् ॥१६॥
गेहं नाकति गर्वितः प्रवणति स्त्रीसंगमो मोक्षति
द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति ।
मृत्युर्वैद्यति दूषणं सुगुणति त्वत्पादसंसेवनात्
त्वां वन्दे भवभीतिभञ्जनकरीं गौरीं गिरीशप्रियाम् ॥१७॥
आद्यैरग्निरवीन्दुबिम्बनिलयैरम्ब त्रिलिङ्गात्मभि-
र्मिश्रा रक्तसितप्रभैरनुपमैर्युष्मत्पदैस्तौस्त्रिभिः ।
स्वात्मोत्पादितकालकोकनिगमावस्थामरादित्रये-
रुद्भूतं त्रिपुरेति नाम कलयेद्यस्ते स धन्यो बुधः ॥१८॥
आद्यो जाग्यतमार्थवाचकतया स्वः स्वरः पञ्चमः
सर्वोत्कृष्टतमार्थवाचकतया वर्णः पवर्गान्तकः ।
वक्तृत्वेन महाविभूतिसरणिस्त्वाधारगो ह्यतो
भ्रूमध्यास्थित इत्यतः प्रवणता ते गीयते चागमैः ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गायत्री साशिरा तुरीयसहिता सन्ध्यामयीत्यागमै-
राख्याता त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणाम् ।
तत्तद्दर्शनमुख्यशक्तिरपि च त्वं ब्रह्म कर्मेश्वरी
कर्त्रर्हन् पुरुषो हरिश्च सविता बुद्धः शिवस्त्वं गुरुः ॥२०॥
अन्नप्राणमनः प्रबोधपरमानन्दैः शिरः पक्षयुक्-
पुच्छात्मप्रकटैर्महोपनिषदां वाग्भिः प्रसिद्धीकृतैः ।
कोशैः पञ्चभिरेभिरम्ब भवतीमेतत्प्रलीनामिति
ज्योतिः प्रज्वलदुज्ज्वलात्मचपलां यो वेद स ब्रह्मवित् ॥२१॥
सच्चित्तत्त्वमसीतिवाक्यविदितैरध्यात्मविद्याशिव-
ब्रह्माख्यैरतुलप्रभावसहितैस्तत्त्वैस्त्रिभिः सद्गुरोः ।
तद्रूपस्य मुखारविन्दविवरात् संप्राप्य दीक्षामतो
यस्त्वां विन्दति तत्त्वतस्तदहमित्यार्ये स मुक्तो भवेत् ॥२२॥
सिद्धान्तैर्बहुभिः प्रमाणगणितैरन्यैरविद्यातमो-
नक्षत्रैरिव सर्वमन्धतमसं तावन्न निर्भिद्यते ।
यावत्ते सवितेव संमतमिदं नोदेति विश्वान्तरे
जन्तोर्जन्मनिवारणैकभिदुरं श्रीशाम्भवि श्रीशिवे ॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आत्मासौ सकलेन्द्रियाश्रयमनोबुद्ध्यादिभिः शोचितः
कर्मबद्धतनुर्जनिं च मरणं प्राप्नोति यत्कारणम् ।
तत्ते देवि महाविलासलहरीदिव्यायुधानां जय-
स्तस्मात्वां गुरुमभ्युपेत्य कलयेत्त्वामेव चेन्मुच्यते ॥२४॥
नानायोनिसहस्रसंभववशाज्जाता जनन्यः कति
प्रख्याता जनकाः कियन्त इति मे सेत्स्यन्ति चाग्रे कति ।
एतेषां गणनैव नास्ति महतः संसारसिन्धोर्विधे-
र्भीतं मां नितरामनन्यशरणं रक्षानुकम्पानिधे ॥२५॥
देहक्षोभकरैर्व्रतैर्बहुविधैर्दानैश्च होमैर्जपैः
संतानैर्हयमेधमुख्यसुमखैर्नानाविधैः कर्मभिः ।
यत्संकल्पविकल्पभावमलिनं ख्यातं पदं तस्य ते
दूरादेव निवर्तते परतरं मातः पदं निर्मलम् ॥२६॥
पञ्चाशन्निजदेहजाक्षरभवैर्नानाविधैर्धातुभि-
र्बद्धैर्यैः पदवाक्यमानजनकैरर्थाविनाभावितैः ।
साभिप्रायवदर्थकर्मफलदैः ख्यातैरनन्तैरिदं
विश्वं व्याप्य चिदात्मनाहमहमित्युज्जृम्भसे मातृके ॥२७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीचक्रं श्रुतिमूलकोश इति ते संसारचक्रात्मकं
विख्यातं तदधिष्ठिताक्षराशीवज्रपोतिर्मयं सर्वतः।
एतन्मन्त्रमयात्मिकाभिररुणं श्रीसुन्दरीभिर्वृतं
मध्ये बैन्दवसिंहपीठललिते त्वं ब्रह्मविद्या शिवे॥२८॥
विसर्ग बिन्दु प्राणै जीवसहितं बिन्दुत्रिबीजात्मकं
षट्कूटानि विपर्ययेण निगदेत्तारात्रिबालावलैः।
एभिः संपुटितं प्रजप्य विहरेत्प्रासादमन्त्रं परं
गुह्याद्गुह्यतमं मयोगजनितं सद्भोगमोक्षप्रदम्॥२९॥
आताम्रार्कसहस्रदीप्तिपरमा सौन्दर्यसारैरलं
लोकातीतमहोदयैरुपयुता सर्वोपमागोचरैः।
नानानर्घ्यविभूषणैरगणितैर्जाज्वल्यमानाभितः
श्रीमातास्त्रिपुरारिसुन्दरि कुरु स्वान्ते निवासं मम॥३०॥
शिञ्जन्नूपुरपादकङ्कणमहामुद्रासुलाक्षारसा-
लङ्कारांङ्कितमङ्घ्रिपङ्कजयुगं श्रीपादुकालङ्कृतम्।
उद्यत्स्वर्णरवचन्द्रखण्डरुचिरं राजज्जपासंनिभं
ब्रह्मादित्रिदशासुरार्चितमहं मूर्ध्नि स्मराम्याम्बिके॥३१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आरक्तच्छविनातिमार्दवभुजा निश्वासहार्येण स-
त्कौशेयेन विचित्ररत्नखचितैर्मुक्ताफलैरुज्ज्वलैः ।
कूजत्काञ्चनकिङ्किणीभिरभितः संनद्धकाञ्चीगुणै-
रादीप्तं सुनितम्बबिम्बमरुणं ते पूजयाम्यम्बिके ॥३२॥
कस्तूरीघनसारकुङ्कुमरजोगन्धोत्कटैश्चन्दनै-
रालिप्तं मणिमालयातिरुचिरं ग्रैवेयहारादिभिः ।
दीप्तं दिव्यविभूषणैरगणितैर्ज्योतिर्विभास्वत्कुच-
व्याजस्वर्णघटद्वयं हरिहरब्रह्मादिपीतं भजे ॥३३॥
मुक्तारत्नविचित्रकान्तिललितैस्ते बाहुवल्लीरहं
केयूराङ्गदबाहुदण्डवलयैर्हस्ताङ्गुलीभूषणैः ।
संपृक्ताः कलयामि हीरमणिमन्मुक्तावलीकीलित-
ग्रीवापट्टविभूषणेन सुभगं कण्ठं च कम्बुश्रियम् ॥३४॥
उद्यत्पूर्णकलानिधिश्रिवदनं भक्तप्रसन्नं सदा
संफुल्लाम्बुजपत्रकान्तिसुषमाधिक्कारदक्षेक्षणम् ।
सानन्दं कृतमन्दहासमसकृत्प्रादुर्भवत्कौतुकं
कुन्दाकारसुदन्तपङ्क्तिशशिभापूर्णं स्मराम्यम्बिके ॥३५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तप्तस्वर्णकृतोरुकुण्डलयुगं माणिक्यमुक्तोल्लस-
द्धीराबद्धमनन्यतुल्यमपरं हैमं च चक्रद्वयम् ।
शुक्राकारनिकारदक्षममलं मुक्ताफलं सुन्दरं
बिभ्रत्कर्णयुगं भजामि ललितं नासाग्रभागं शिवे॥३६॥
जातीचम्पककुन्दकेसररजोगन्धोत्किरत्केतकी-
नीपाशोकशिरीषमुख्यकुसुमैः प्रोत्तंसिता धूपिता ।
आनीलाञ्जनतुल्यमत्तमधुपश्रेणीव वेणी तव
श्रीमातः श्रयतां मदीयहृदयाम्भोजं सरोजालये॥३७॥
लेखालम्पविचित्ररत्नखचितं हैमं किरीटोत्तमं
मुक्ताकाञ्चनकाङ्क्षिणीगणमहाहीरप्रबोधोज्ज्वलम् ।
चञ्चच्चन्द्रकलाकलापललितं देवद्रुपुष्पार्चितं
माल्यैरम्ब विलम्बितं सुशिखरं बिभ्रच्छिरस्ते भजे॥३८॥
शृङ्गारादिरसालयं त्रिभुवनैर्माल्यैरतुल्यैर्युतं
सर्वाङ्गीणसदङ्गरागसुरभि श्रीमद्वपुर्धूपितम् ।
ताम्बूलारुणपल्लवाधरयुतं रम्यं त्रिपुण्ड्रं दध-
द्भालं नन्दनचन्दनेन जननि ध्यायामि ते मङ्गलम्॥३९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं यः स्मरति प्रबुद्धसुमतिः श्रीमत्स्वरूपं परं
वृद्धोऽप्याशु युवा भवत्यनुपमः स्त्रीणामनङ्गायते ।
सोऽष्टैश्वर्यपतिरस्कृताखिलसुरः श्रीजृम्भिनात्मालयः
पृथ्वीपालकिरीटकोटिवलभीपुष्पार्चिताङ्घ्रिर्भवेत् ॥४०॥

अथ तव धनुः पुण्ड्रेक्षुकृत्प्रसिद्धमति सुति
त्रिभुवनवधूमुखाब्जज्योत्स्नाकलानिधिमण्डलम् ।
सकलजननि स्मारं स्मारं गतः स्मरतां नर-
स्त्रिभुवनवधूमोहाम्भोधेः प्रपूर्णविधुर्भवेत् ॥४१॥

प्रसूनशरपञ्चकप्रकटजृम्भणागुम्फितं
त्रिलोकमवलोकयत्यमलचेतसा चिन्तयन् ।
अशेषरमणीजनस्मरविजृम्भणे यः सदा
पटुर्भवति ते शिवे त्रिजगदङ्गनाक्षोभणे ॥४२॥

पाशं प्रपूरितमहासुमतिप्रकाशे
यो वा तव त्रिपुरसुन्दरि सुन्दरीणाम् ।
आकर्षणेऽखिलवशीकरणे प्रवीणं
चित्ते दधाति स जगत्त्रयवश्यकृत्स्यात् ॥४३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यः स्वान्ते कलयति कोविदास्त्रिलोक-
सम्मारम्भणचणमप्युदारवीर्यम् ।
मातस्ते विजयमहाङ्कुशं मयोवान्
देवान् स्तम्भयति च भूभुजोऽन्यसैन्यम् ॥४४॥
चापध्यानवशाद्भवोद्भवमहामोहस्य संजृम्भणं
प्रख्यातं प्रसवेषुचिन्तनवशात्ताच्छन्त्यं सुधीः ।
पाशध्यानवशात्समस्तजगतां मृत्योर्वशत्वं महा-
दुर्गस्तम्भमहाङ्कुशस्य मननान्मायामभेयां तरेत् ॥४५॥
न्यासं कृत्वा गणेशग्रहभगणमहायोगिनीराशिपीठैः
पञ्चाशन्मातृकाणैः सहितबहुकलैरष्टवाग्देवताभिः ।
स श्रीकण्ठादियुग्मैर्निजाविमलतनौ केशवाद्यैश्च तत्वैः
षट्त्रिंशद्भिर्धराद्यैर्भगवति भवतीं यः स्मरेत्स त्वमेव ॥४६॥
सुरपतिपुरलक्ष्मीजृम्भणातीतलक्ष्मीः
प्रसरति निजगेहे यस्य देवं त्वमार्ये ।
विविधबहुकलानां पात्रभूतस्य तस्य
त्रिभुवनविदिता सा जृम्भते स्फूर्तिरच्छा ॥४७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मातस्त्वं भूर्भुवः स्वर्महरसि सुतनुस्त्वन्तरिक्षेन्दुसूर्यै-
रात्मा शुक्रामरेन्द्रैरपि निगममहाब्रह्मभिः प्रोतशक्तिः ।
प्राणापानादिमुक्तैः कलयति सकलं मानसं ध्यानयोगं
येषां तेषां सपर्या भवति सुरकृता ब्रह्मता योगिनां च ॥४८॥

क्व मे बुद्धिर्वाचा परमविदुषो मन्दसरणिः
क्व ते मातर्ब्रह्मप्रमुखविबुधस्याप्यवचसाम् ।
अमून्मे विस्फूर्तिः परतरमहिम्नस्तवनुतिः
प्रसिद्धं क्षन्तव्यं बहुलतरचापल्यमिति मे ॥४९॥

प्रसीद परदेवते मम हृदि प्रभूतं भयं
विदारय दरिद्रतां दलय देहि सर्वज्ञताम् ।
विधेहि करुणानिधे चरणपद्मयुग्मं स्वयं
विदारितजरामृति त्रिपुरसुन्दरि श्रीशिवे ॥५०॥

इति त्रिपुरसुन्दरीस्तुतिमिमां पठेद्यः सुधीः
स सर्वदुरिताटवीपटलचण्डदावानलः ।
भवेन्मतासि वाञ्छितं प्रचुरसिद्धिऋद्धिर्भवे-
दनेकविधसंपदां पदमनन्यतुल्यो भवेत् ॥५१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संगीतं सरसं विचित्रकवितामाम्नायवाक्यस्मृतिं
व्याख्यानं हृदि तावकीनचरणद्वन्द्वं च सर्वज्ञताम् ।
श्रद्धां कर्मणि शाम्भवीं विपुलं श्रीजृम्भणं मन्दिरे
सौन्दर्यं वपुषि प्रदेहि जगतामम्बेश्वरि श्रीगुरो ॥५२॥

पृथ्वीपालप्रकरमुकुटस्रग्रजोराजिताङ्घ्रि-
विद्वत्पूजास्तुतिशतसमाराधितो बाधितारिः ।
विद्याः सर्वाः कलयति हृदा व्याकरोति प्रवाचा
लोकाश्चर्यैर्नवनवपदैरिन्दुबिम्बप्रकाशैः ॥५३॥

मूल्यं वैदुष्यमुद्यद्दिनकरकिरणाकारमाकारतेजः
सुज्ञानं भूरिमार्गं निगमनिगमनं दुर्गमं योगमार्गम् ।
आयुष्यं ब्रह्मपोष्यं हरगिरिविशदां कीर्तिमभ्येत्य भूमौ
देहान्ते ब्रह्मपारं परतरचरणाकारमभ्येति विद्वान् ॥५४॥

दुर्वाससा विदिततत्त्वमुनीश्वरेण
विद्याकलायुवतिमन्मथमूर्तिनैतत् ।
स्तोत्रं व्यधायि रुचिरं त्रिपुराम्बिकायाः
वेदागमोक्तपरलौकिकदिव्यमूर्तिः ॥५५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सदसदनुग्रहनिग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ॥५६॥

॥ इति श्रीदुर्वाससा मुनीन्द्रेण विरचितं
श्रीत्रिपुरसुन्दरीमहिम्नस्तोत्रं
संपूर्णम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्यामलानवरत्नमाला

ध्यानश्लोकौ

कुचाञ्चितविपञ्चिकां कुटिलकुन्तलालङ्कृतां
कुशेशयनिवेशिनीं कुटिलचित्तविद्वेषिणीम् ।
मदालसगतिप्रियां मनसिजारिराज्यश्रियं
मतङ्गकुलकन्यकां मधुरभाषिणीमाश्रये ॥

कुन्दमुकुलाग्रदन्तां कुङ्कुमपङ्केन लिप्तकुचभाराम् ।
आनीलनीलदेहामम्बामखिलाण्डनायिकां वन्दे ॥

स्तोत्रारम्भः

ओङ्कारपञ्जरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥१॥

दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां संगीतमातृकां वन्दे ॥२॥

श्यामतनुसौकुमार्यां सौन्दर्यानन्दसम्पदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासम् ।
मुखमम्ब मोदयतु मे मुक्ताताटङ्कमुग्धहसितं ते ॥४॥

सारिगमपधनिरतां तां वीणासंक्रान्तकान्तहस्तां ताम् ।
शान्तां मृदुलस्वान्तां कुचभरतान्तां नमामि शिवकान्ताम् ॥५॥

अवटुतटघटितचूलीपाली तालीपलाशताटङ्काम् ।
वीणावादनवेलाकम्पितशीरसं नमामि मातङ्गीम् ॥६॥

वीणारवानुषङ्गं विकचमुखाम्भोजमाधुरीभृङ्गम् ।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापाङ्गम् ॥७॥

मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवनवनसारङ्गीं संगीताम्भोरुहानुभवभृङ्गीम् ॥८॥

मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं ते ।
मातस्तव स्वरूपं मङ्गलसंगीतसौरभं मन्ये ॥९॥

फलश्रुतिः

नवरत्नमाल्यमेतद्रचितं मातङ्गकन्यकाभरणम् ।
यः पठति भक्तियुक्तः स भवेद्वागीश्वरः साक्षात् ॥

इति श्रीमच्छङ्करभगवत्पादाचार्यविरचिता
श्यामलानवरत्नमालिका सम्पूर्णा ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीगणेशाय नमः ॥

कल्याणस्तुतिः

महात्रिपुरसुन्दरीषोडशोपचारपूजा

विद्यानन्दनाथसोमसुन्दरविरचिता

निरन्तरमहाविघ्नघर्मसंतापशान्तये ।
करीन्द्रमुखकल्लोललहरीं तनुमाश्रये ॥१॥

ब्राह्मीकालसमाधिसान्द्रमकणं सौभाग्यविद्याप्रदं
ब्रह्माविष्णुशिवप्रभावभानिशं ब्रह्माण्डनीपाङ्कुरम् ।
बाह्यान्तःस्फुरणं प्रकाशचरणं बाह्याह्रकालं कृतं
सौभाग्यषट्काहैर्युतं त्रिपथगां सौख्यं भजे भैरवम् ॥२॥

कल्याणोज्ज्वलकार्मुकान्वितकरानन्देन मन्दास्मितां
कारुण्याङ्कुशपञ्चबाणकलितां कन्दर्पदर्पान्विताम् ।
काम्याकर्षणादिरूपपाशभरितां बालार्ककोटिप्रभां
कादिक्षान्ततनुत्रयां त्रिनयनां ध्यायेच्छिवां शाम्भवीम् ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एकाकारतया प्रपञ्चभरितामेकान्तसंचारिणी-
मेनाङ्कोज्ज्वलसंविदं परकलामेनाङ्कबिम्बाननाम् ।
एको देव इति प्रसिद्धमुनिभिः प्रख्यातचिन्मात्रका-
मैकारार्णवबैन्दवीं पराशिवामेकाक्षरामावहे ॥४॥

ईशानादिमहेशविष्णुशुचिषद्ब्रह्मादिपादीन्नतान्
प्रेताराङ्कितदिव्यरत्नविलसत्सिंहासने संस्थिताम् ।
ईषद्भक्तितया त्वदीयचरणाम्भोजार्चने दीपने
निष्ठाज्ञानक्रियात्मकासनमिदं दास्यामि ते शाम्भवि ॥५॥

लक्षज्ञानसुधारसार्णवजलेनापूर्य पाद्यार्घकं
लाक्षालङ्कृतपादपङ्कजयुगं संभाव्य भक्त्या पुनः ।
लक्ष्मीराजितहैमधामकलशेनापूर्य शीताम्बुना
ह्याचम्यार्घ्यमिह प्रकल्पितमिदं गृह्णातु मे शाम्भवी ॥६॥

ह्रीङ्कारोज्ज्वलवर्णकल्पिततलालङ्कारसिंहासने
ह्रीङ्कारान्तसरस्वती च यमुनागङ्गाजलैरादरात् ।
ह्रीङ्कारादिसमस्तवर्णनिवहैः संस्तूयमानैर्मुदा
ह्रीङ्कारीमभिषेचयामि सततं ह्रीङ्कारपद्मे सदा ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ह्रव्याग्रूढतनुप्रकाशलहरी क्षौमाम्बरं भाकितो
हंसस्फाटिकचान्द्रिकाभिरमलं दत्वा सितोत्तर्यकम् ।
हारालङ्कृतपीवरस्तनयुगामानन्दमन्दस्मितां
ह्रव्यातीतपथामनन्तविभवामाराधयाम्यम्बिकाम् ॥८॥
सर्वालङ्कृतबाहुदण्डवलयं मुक्तादिहारान् बहून्
सान्द्रानन्दकरं प्रसिद्धमणिभिः सान्द्रं किरीटं शुभम् ।
सौवर्णोज्ज्वल~~[illegible]~~रत्नकुण्डलयुगं सौन्दर्यचिन्तामणिं
सल्लापान्वितहारनूपुरयुगं गृह्णातु मे शाम्भवी ॥९॥
कस्तूरीघनसारकुङ्कुमरजोगन्धान्वितं चन्दनं
कर्पूरच्छवितारकाममलाद् भक्त्या समर्पीकृतात् ।
कल्हारोत्पलजातिचम्पकरुचिपद्मोत्पलैः केतकी-
काञ्चीमाल्लिककल्पवृक्षकुसुमैरभ्यर्चयामीश्वरीम् ॥१०॥
हं बीजार्घकलात्मिकान्ताविभवैरत्नादिचक्राङ्किते
धूपं देवि ह कल्पयामि सततं ब्रह्मेन्द्रवन्द्ये शिवे ।
हाहाकाररवं प्रसिद्धकलनाहूँकारबीजात्मके
हारिक्राङ्कितहेमधामकमले गृहीष्व दीपं महत् ॥११॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लंबीजोङ्काङ्कितासिद्धमार्गसहजद्रव्यैरनेकैर्मुदा –
लङ्काराङ्कितवह्निभानुसदृशैः पात्रैः सुधापूरितैः ।
लोलामोदमरीचहिङ्गुसुरभिर्युक्तैः सुसर्वैः सदा
लक्ष्मीराज्ञितपादुकान्तविभवां संतर्पयामीश्वरीम् ॥१२॥
ह्रीङ्कारत्रयवर्णपीठनिलये ह्रीङ्कारमन्त्रात्मिके
ह्रीङ्कारोज्ज्वलहेमपीठचसके सिद्धान्नभक्षान् बहून् ।
ह्रीं श्रीं कल्पितकामधेनुसततं क्षीराज्यमध्वामृतान्
ह्रीङ्कारेण निवेदयामि सततं ह्रीङ्कारनादप्रिये ॥१३॥
सर्वाम्नायविधानपूतसलिलं सौगन्ध्यगन्धोर्युतं
सौन्दर्येश्वरवल्लभे परशिवे गृह्णीष्व हस्तोदकम् ।
संलापार्णवमध्यसन्ततरसं सम्पूर्णचन्द्रप्रभं
सत्कर्पूरयुतं गृहाण वरदे ताम्बूलमव्याहतम् ॥१४॥
आदिक्षान्तसमस्तवर्णमणिभिः संकीर्णदीपाङ्कुरं
कालैकत्रयसप्तपञ्चनवकं त्रैवर्णपात्रैर्मुदा ।
काव्यालङ्कृतनाटकप्रभृतिभिः संगीतनृत्यैर्मुहुः
कल्लोलं तदिदं गृहाण वरदे नीराजनं निर्मलम् ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लावण्यांगमदीपदीपनमिदं सन्मार्गमार्गोदयं
छत्रं चामरदर्पणं व्यजनकं दत्वा शिवामादरात् ।
नीता पूजितपादपङ्कजमहा संपूज्य गन्धाक्षतै-
र्लक्ष्मीचक्रनिवासिनीं कमलिनी संतर्पयामीश्वरीम् ॥१६॥
ह्रीङ्कारीं शिवतत्वमद्यममभवां विद्यात्मतत्वात्मिकां
ह्रीङ्कारत्रयवाग्भवादिमनुभिः संशोध्य तत्वत्रयम् ।
जप्त्वा कामसमस्तकादिमनुभिर्नत्वा पुनः शाम्भवीं
स्तुत्वा शङ्करवल्लभां त्रितयतां मुक्तात्मपार्मीश्वरीम् ॥१७॥

चण्डेश्वरैरर्चित दृष्टि बुद्ध्या
निर्माल्य भोज्यान् विविधान् समर्प्य ।
दत्वा बलिं क्षेत्रपतेः प्रपङ्क्त्या
विश्रामतो वैवदुकान् न्ययुङ्क्त ॥१८॥

ध्यानावाहनमासनार्घ्यकमिदं स्नानांशुकं भूषणं
गन्धं चाक्षतपुष्पमाल्यममलं ज्योतिं च नैवेद्यकम् ।
ताम्बूलार्घ्यकछत्रचामरमिदं रत्नोज्ज्वलं दर्पणं
मायूरव्यजनं प्रदक्षिणनमस्कारान् गृहाणाम्ब मे ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कल्याणस्तुतिमेतदीशममलं ह्रीङ्कारमन्त्रात्मकं
सर्वज्ञानकरं परं कविजनालङ्कारह्रीङ्कारदम् ।
सर्वज्ञादिसमस्तसिद्धिकलनं ह्रीङ्कारसाम्राज्यदं
भक्तस्तोत्रमिदं पठित्वाऽतिजनो ह्रीङ्कारमेति क्षणात् ॥ २०॥

॥ इति विद्यानन्दनाथसोमसुन्दरविरचितं
श्रीमहात्रिपुरसुन्दरीषोडशोपचारपूजाकल्पनं नाम
कल्याणस्तुतिः सम्पूर्णा ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ साम्बपञ्चाशिका ॥

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डले।
भास्वद्वर्णपदक्रमैरिततमः सप्तस्वराश्वैर्वियद्
विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥१॥

यस्मात् सर्वं प्रसरतितरां ज्ञप्तिकर्तृस्वभावाद्
रूपैर्बाह्यैर्विषयरचितैराबृत्तिर्यस्य नास्ति।
शब्दार्थाभ्यां वितथमिव यस्तथ्यरूपं बिधत्ते
जीवादित्यं तमहमतनुं चिन्तयन्तं नमामि ॥२॥

ओमित्यन्तर्नदति नियतं यः प्रतिप्राणि शब्दो
वाणी यस्मात् प्रभवति परा शब्दतन्मात्रगर्भा।
प्राणापानौ वहति च समौ यो मिथो ग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये ॥ ३॥

यस्त्वक्चक्षुश्श्रवणरसना घ्राणपाण्यङ्घ्रिवाणी
पायूपस्थस्थितिरपि मनोबुद्ध्यहङ्कारमूर्तिः।
तिष्ठत्यन्तर्बहिरपि जगद् भासयन् द्वादशात्मा
मार्तण्डं तं सकलकरणाधारमेकं प्रपद्ये ॥ ४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णानत्र प्रकटकरणैः प्राणसङ्गात् प्रसूते ।
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥५॥

ऊर्ध्वाधस्तादतनुभुवनान्यन्तरा सन्निविष्टा
नानानाडीप्रसवगहना सर्वभूतान्तरस्था ।
प्राणापानग्रसननिरतैः प्राप्यते ब्रह्मनाडी
सा नः श्वेता सर्वा भवतु परमादित्यमूर्तेः प्रसन्ना ॥६॥

यत्रारूढं त्रिगुणवपुषि ब्रह्म तद् बिन्दुरूपं
योगीन्द्राणां यदपि परमं भाति निर्वाणमार्गः ।
त्र्याधारः प्रणव इति यन्मण्डलं चण्डरश्मे-
रन्तः सूक्ष्मं बहिरपि बृहन्मुक्तये तत् प्रपद्ये ॥७॥

यस्मिन् सोमः सुरपितृनरैरन्वहं पीयमानः
क्षीणः क्षीणः प्रविशति यतो वर्धते चापि भूयः ।
यस्मिन् वेदा मधुनि सरघाकारवद् भान्ति चाग्रे
तच्चण्डांशोरमृतममितं मण्डलस्थं प्रपद्ये ॥८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ऐन्द्रीमाशां पृथुकवपुषा पूरयित्वा क्रमेण
क्रान्ताः सप्त प्रकरहरिणा येन पादेन लोकाः।
कृत्वा ध्वान्तं विगलितबलिव्याजि पातालतीनं
विश्वालोकः स जयति रविः स त्वमेवोर्ध्वरश्मिः॥ ९॥

ध्यात्वा ब्रह्म प्रथममतनु प्राणमूले नदत् तद्
दृष्ट्वा चान्तः प्रणवमुरवरं व्याहृतीः सम्युगुत्त्वा।
यत् तद् वेदे तदिति सवितुर्ब्रह्मणोक्तं वरेण्यं
तद् भर्गाख्यं किमपि परमं धामगर्भं प्रपद्ये॥१०॥

तं स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं
सैवाविद्या तदपि सुतरां तद्व्युदासाय युक्तः।
स्तौम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा
वेद्योपायः पर इति बुधैर्गीयते स्वल्पविद्या॥११॥

योऽनाद्यन्तोऽप्यतनुरगुणोऽणोरणीयान् महीयान्
विश्वाकारः सगुण इति वा कल्पनाकल्पिताङ्गः।
नानाभूतप्रकृतिविकृतीर्दर्शयन् भाति यो वा
तस्मै तस्मै भवतु परमादित्य! नित्यं नमस्ते॥१२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्त्वाख्याने त्वयि मुनिजना नेति नेति ब्रुवन्तः
भ्रान्ताः सम्यक् त्वमिति न च तैरीदृशो वेति चोक्तः।
तस्मात् तुभ्यं नम इति वचोमात्रमेवाभिवच्मि
प्रायो यस्मात् प्रभवति परा भारती ज्ञानगर्भा ॥१३॥

सर्वाङ्गीणः सकलवपुषामन्तरे योऽन्तरात्मा
तिष्ठन् काष्ठे दहन इव नो दृश्यसे युक्तिशून्यैः।
यच्च प्राज्ञारणिषु नियतैर्मथ्यमानासु सद्भि-
र्दृश्यं ज्योतिर्भवसि परमादित्य तस्मै नमस्ते ॥१४॥

स्तोता स्तुत्यः स्तुतिरिति भवान् कर्तृकर्मक्रियात्मा
क्रीडत्येकस्तव नुतिविधावस्वतन्त्रस्ततोऽहम्।
यद्वा वच्मि प्रणयसुभगं गोपते तच्च तथ्यं
त्वत्तो ह्यन्यत् किमिव जगतां विद्यते तन्मृषा स्यात् ॥१५॥

ज्ञानं नान्तःकरणरहितं विद्यतेऽस्मद्विधानां
त्वं चात्यन्तं सकलकरणागोचरत्वादचिन्त्यः।
ध्यानातीतस्त्वमिति न विना भक्तियोगेन लभ्य-
स्तस्माद् भक्तिं शरणममृतप्राप्तयेऽहं प्रपन्नः ॥१६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हार्दं हन्ति प्रथममुदिता या तमः संश्रितानां
सत्त्वोद्रिक्ता तदनु च रजः कर्मयोगक्रमेण।
सा स्वभ्यस्ता प्रथ्यतितरां सत्त्वमेव प्रसन्ना
निर्वाणाय व्रजति शमिनां तऽर्क! भक्तिस्त्वयीव ॥१७॥

तामासाद्य श्रियमिव गृहे कामधेनुं प्रवासे
ध्वान्ते भातिं धृतिमिव वने योजने ब्रह्मनाडीम्।
नावं चास्मिन् विषमविषयग्राहसंसारसिन्धौ
गच्छेयं ते परमममृतं यन्न शीतं न चोष्णम् ॥१८॥

अग्नीषोमावखिलजगतः कारणं तौ मयूखैः
सर्गादाने सृजति भगवन् ह्रासवृद्धिक्रमेण।
तावेवान्तर्विषुवति समौ जुह्वतामात्मवह्नौ
द्वावप्यस्तं नयसि युगपन्मुक्तये मुक्तिभाजाम् ॥१९॥

स्थूलत्वं ते प्रकृतिगहनं नैव लक्ष्यं यजन्तां
सूक्ष्मत्वं वा तदपि सदसद्व्यत्ययभावादचिन्त्यम्।
ध्यायामीत्थं कथमविदितं त्वामनाद्यन्तमन्त-
स्तस्मादर्क! प्रणयिनि मयि स्वात्मनैव प्रसीद ॥२०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यत्तद्वेद्यं किमपि परमं शब्दतत्त्वं त्वमन्त-
स्तत् सद्व्यक्तिं जिगमिषु शनैस्त्रीति मात्राः कलाः स्वे।
अव्यक्तेन प्रणववपुषा बिन्दुनादोदितं स-
च्छब्दब्रह्मोच्चरति करणव्यञ्जितं वाचकं ते ॥२१॥
प्रातः सन्ध्यारुणकिरणभागृङ्मयं राजसं य-
न्मध्ये चापि ज्वलदिव यजुः शुक्लभाः सात्त्विकं वा।
सायं साम स्तिमितकिरणं यत् तमोल्लासि रूपं
साह्नः सर्गस्थितिलयविधाकृतिस्ते त्रयीव ॥२२॥
यं पातालोदधिमुनिनगद्वीपलोकाधिबीज-
च्छन्दोभूतस्वरमरवनदासप्तसात्त्वं प्रपन्नाः।
यं चैकाश्वं निरवयववाग्भावमात्राधिरूढं
तं त्वामेव स्वरगुणकलावर्जितं प्रात्यनश्वम् ॥२३॥
दिव्यं ज्योतिः सलिलपवनैः पूरयित्वा त्रिलोकी-
मेकीभूतं पुनरपि च तत्सारमादाय गोभिः।
अन्तर्लीनो विशसि वसुधां तद्गतः सूयसेऽन्नं
तच्च प्राणस्त्वमिति जगतां प्राणभृत् सूर्य आत्मा ॥२४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अग्नीषोमौ प्रकृतिपुरुषौ बिन्दुनादौ च नित्यौ
प्राणापानावपि दिननिशे ये च सत्यानृते द्वे ।
धर्माधर्मौ सदसदुभयं योऽन्तराविश्य योगी
वर्तेतात्मन्युपरतमतिर्निर्गुणं त्वां विशेत् सः ॥२५॥
गर्भाधानप्रसवविधये सुप्रयोरिन्दुभासोः
सापत्न्येनाभिमुखमिव खे कान्तयोर्मध्यसंस्थः ।
द्यावापृथ्व्योर्वदनकमलं गोमुखैर्बोधयित्वा
पर्यायेणापिबसि भगवन् षड्रसास्वादलोलः ॥२६॥
सोमं पूर्णामृतमिव चरुं तेजसा साधयित्वा
कृत्वा तेनानलमुखजगत्तर्पणं वैश्वदेवम् ।
आमावास्यं विघसमिव खे तत्कलाशेषमश्नन्
ब्रह्माण्डान्तर्गृहपतिरिव स्वात्मयागं करोषि ॥२७॥
कृत्वा नक्तं दिनमिव जगद्वीजमाव्यक्तिकं यत्
तत्रैवान्तर्दिनकर ! तथा ब्रह्ममत्यन्ततोऽल्पम् ।
दैवं पित्र्यं क्रमपरिणतं मानुषं चाल्पमल्पं
कुर्वन् कुर्वन् कलयसि जगत् पञ्चधावर्तनाभिः ॥२८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्त्वालोके तपन! सुदिने ये परं सम्प्रबुद्धा
ये वा चित्तोपशमरजनीयोगनिद्रामुपेताः ॥
तेऽहोरात्रोपरमपरमानन्दसन्ध्यासु सौरं
भित्त्वा ज्योतिः परमपरमं यान्ति निर्वाणसंज्ञम् ॥२९॥

आब्रह्मेदं नवीमिव जगज्जङ्गमस्थावरान्तं
सर्गे सर्गे विसृजसि रवे! गोभिरुद्भिन्नसोमैः
दीप्तैः प्रत्याहरसि च लये तद् यथायोनि भूयः
सर्गान्तादौ प्रकटविभवां दर्शयन् रश्मिलीलाम् ॥३०॥

भित्त्वा नित्योपचितमुचितं ब्रह्मतेजःप्रकाशं
रूपं सर्गस्थितिलयमुचा सर्वभूतेषु मध्ये।
अन्तेवासिष्विव सुगुरुणा यः परोक्षः प्रकृत्या
प्रत्यक्षोऽसौ जगति भवता दर्शितः स्वात्मनात्मा ॥३१॥

लोकाः सर्वे वपुषि नियतं ते स्थितास्त्वं च तेषा-
मेकैकस्मिन् युगपदगुणो विश्वहेतोर्गुणीवं ।
इत्थं भूते जगति भगवन्! न त्वदन्योऽस्मि सत्यं
किन्तु ह्रस्त्वं परमपुरुषोऽहं प्रकृत्यैव चाज्ञः ॥३२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सङ्कल्पेच्छाद्यखिलकरणप्राणवाण्यो वरेण्याः
सम्पन्ना मे त्वदभिनमनाज्जन्म चेदं शरण्यम्।
मन्ये चास्तं जिगमिषु शनैः पुण्यपापं द्वयं वा
भक्तेश्छद्दे तव चरणयोरन्यथा नो भवेताम् ॥ ३३॥
सत्यं भूयो जननमरणे त्वत्प्रपन्नेषु न स्ता-
स्तत्राप्येकं तव नुतिफलं जन्म याचे यदीत्थम्।
त्रैगुण्येशः शम इव परः पुण्यकायोऽप्ययोनिः
संसाराब्धौ प्लव इव जगत्तारणाय स्थिरः स्याम् ॥ ३४॥
सौषुम्नेन त्वममृतपथेनेत्य शीतांशुभावं
पुष्णास्यग्रे सुरनरपितॄन् शाम्यतीभिः कलाभिः।
पश्चादम्भो विशसि वसुधाश्चौषधीस्तत्कृतोऽपि
प्रीणास्येवं त्रिभुवनमतस्ते जगन्मित्रता किं ॥ ३५॥
मन्दाक्रान्ते तमसि भवता नाथ! दोषावसाने
नालम्बिनी मम मतिरियं गूढनिद्रां जहाति।
तस्मादस्तङ्गमिततमसा पद्मिनीवात्मभासा
सौरीत्येषा दिनकर! परं नीयतामाशु बोधम् ॥ ३६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

येन ग्रासीकृतमिव जगत् सर्वमासीत् तदस्त
ध्वान्तं नीत्वा पुनरपि विभो! तद्दयाध्यातचित्तः।
धत्से नक्तंदिनमिव गती शुक्लकृष्णे विभज्य
त्राता तस्माद् भव परिभवाद् दुष्कृताद् देव! भानो!॥३७॥

आसंसारोपचितसदसत्कर्मबन्धाश्रितानामाधिव्याधिप्रजननमरणक्षुत्पिपासार्दितानाम्।
मिथ्याज्ञानप्रबलतमसा नाथ! चान्धीकृतानां
त्वं नस्त्राता भव करुणया यत्र तत्र स्थितानाम्॥३८॥

सत्यासत्यस्खलितवचसां शौचलज्जोज्झितानामज्ञानानामफलसफलप्रार्थनाकातराणाम्।
सर्वावस्थास्वखिलविषयाभ्यस्तकौतूहलानां
त्वं नस्त्राता भव पितृतया भोगलोलार्भकाणाम्॥३९॥

यावद्देहं जरयति जरा नान्तकादेत्य दूतो
नो वा भीमस्त्रिफणभुजगाकारदुर्वारपाशः।
गाढं कण्ठे ग्रसति सहसा जीवितं लोलिहान-
स्तावद् भक्ताभयद! सदयं श्रेयसे नः प्रसीद॥४०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विश्वप्राणग्रसनरसनाटोपकोपप्रगल्भं
मृत्योर्वक्त्रं नयनदहनोद्दामदंष्ट्राकरालम्।
यावद् दृष्ट्वा व्रजति न भयात् पञ्चतामेष काय-
स्तावन्नित्यामृतमय! रवे! पाहि नः कान्दिशीकान् ॥४१॥

शब्दागारं वियदिव वपुस्ते यजुस्साम धाम्नः
सप्तच्छन्दांस्यपि च तुरगा ऋङ्मयं मण्डलं च।
एवं सर्वश्रुतिमयतया मद्वयानुग्रहाद्वा
क्षिप्रं मत्तः कृपणकरुणाक्रन्दमाकर्णयमम् ॥४२॥

नाशं नास्मच्चरणशरणा यान्त्यपि ग्रस्यमाना
दैवैरित्थं सितमिव यशो दर्शयंस्त्वं त्रिलोक्याम्।
मन्ये सोमं क्षततनुममागर्भवृद्ध्या विवस्वन्
चक्षुर्व्यच्छायां नयसि शनकैः स्वांसुषुम्णांशुभासा ॥४३॥

आस्तां जन्मप्रभृति भगवत्सेवनं तादृशे लोके
वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारम्।
ज्योतिर्मात्रस्मृतिपथगतो जीवितान्तेऽपि भास्वन्!
निर्वाणाय प्रभवसि सतां तेन ते कः समोऽन्यः ॥४४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ये चारोग्यं दिशति भगवान् सेवितोऽप्येवमाहु-
स्ते तत्त्वज्ञा जगति सुभगा भोगयोगप्रधानाः।
मुक्तेर्भुक्तेरपि च जगतां बच्च मूकं सुखानां
तस्यान्योऽकोदमृतवपुषः को हि नामास्ति दाता॥ ४५॥

हित्वाहित्वा गुरुचपलतामप्यनेकान् निजार्थान्
यैरेकार्थीकृतमिव भवत्सेवनं भक्तियार्थम्।
तेषामिच्छाम्युपकृतिमहं स्वेन्द्रियाणां प्रियाणा-
मादौ तस्मान्मम दिनपते! देहि तेभ्यः प्रसादम्॥ ४६॥

अप्रत्यक्षात्रिदशभजनाद् यत् परोक्षं फलं तत्
पुंसां युक्तं भवति हि समं कारणेनैव कार्यम्।
प्रत्यक्षस्त्वं सकलजगतां तत् समक्षं फलं मे
युष्मद्भक्तेः समुचितमतस्तच्च याचे यथा त्वाम्॥ ४७॥

किं त्वन्नामोच्चरति वचनं यस्य नोच्चारकस्त्वं
किं वा वाच्यं सकलवचसां विश्वमूर्ते! न यस्त्वम्।
तस्मादुक्तं यदपि तदपि त्वन्नुतौ भक्तियोगा-
दस्माभिस्तद् भवतु भगवंस्त्वत्प्रसादेन धन्यम्॥ ४८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

या पन्थानं दिशति शिशिरश्चुत्तरं देवयानं
या वा कृष्णं पितृपथमथो दक्षिणं प्रावृडाद्यम् ।
ताभ्यामन्या त्रिभुवनदीभजिन्मद्ध्यमावृत्तिशून्या
धन्या कापि प्रकृतिपुरुषावन्तरा मेऽस्तु वृत्तिः ॥ ४१ ॥
स्थित्वा किञ्चिन्मन इव पिबन् सेतुबन्धस्य मध्ये
प्राप्योपेमं ध्रुवपथमथो व्यक्तमुद्दाल्य तालु ।
सत्यादूर्ध्वं किमपि परमं व्योम सीमाद्विशून्यं
गच्छेयं त्वां सुरपितृगती चान्तरा ब्रह्मभूतः ॥ ५० ॥
भक्तिश्रद्धाधरिवलतरुणीवत्सनमेनेदमुक्तं
श्रीशाम्बेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।
यः सावित्रं पठति नियतं स्वात्मवत् सर्वलोकान्
पश्यन् सोऽन्ते व्रजति शुकवन्मण्डलं चण्डरश्मेः ॥ ५१ ॥
सर्वात्मत्वं सवितुरिति यो वाङ्मनःकायबुद्ध्या
रागद्वेषोपरमसमतायोगमेवारुरुक्षुः
धर्माधर्मग्रथनरशनामुक्तये युक्तियुक्तां
स श्रीशाम्बः स्तुतिमिति रवेः सुप्रतिष्ठां चकार ॥ ५२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति परमरहस्यश्लोकपञ्चाशिकैषा
तपनतनमनपुण्या सागमब्रह्मचर्चा।
हरतु दुरितमस्मद्वर्णनाकर्णिता वो
दिशतु च शुभदृष्टिं मातृवद् भक्तिभाजाम् ॥५३॥

शुभमस्तु

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
सरस्वतीभवन १४०७७

परमाद्वयद्वादशिका

ॐ श्री स्वात्मने गुरुभोजनाय नमोनमः ॥

ॐ तद्यातद्यमकल्पमल्पशयनैर्जल्पक्रमं संहरं-
स्तत्संहारगमेन किं कथमिदं कोऽस्मीति भावी विकल्पः ।
भावाभावविभागभासकतया यद्भात्यभग्नप्रभं
तच्छून्यं शिवधाम वस्तु परमं ब्रह्माऽत्र कोऽत्र ग्रहः ॥१॥
यद्यतत्त्वपरिहारपूर्वकं तत्त्वमेषि तदतत्त्वमेव हि ।
यद्यतत्त्वमथ तत्त्वमेव वा तत्त्वमेव ननु तत्त्वमीदृशम् ॥२॥
यद्यद्भाति न भाततः पृथगिदं भेदोऽपि भातीति चेद्
भाने सोऽपि न भाति किं ननु ततस्तज्ज्ञाङ्गिपङ्गुग्रहम् ।
स्वप्ने स्वप्नतया प्रथां गतवति क्रीडैव नो भीतिकृ-
च्छस्त्राघातजलावपातहुतभुङ्निर्घातबन्धादिकम् ॥३॥
ध्यानाक्रियाकलनपूर्वकमध्यवस्ये-
यद्यद्भवान् कथय कोऽस्य जडाद्विशेषः ।
स्फूर्जज्जडोऽपि न किमद्वयबोधधाम-
निःसीमनिर्भ(नि)रवग्रहसत्यरूपम् ॥४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावातीतमवभासकोऽसि यदि तैर्मालिन्यमातन्यते
किं ते तद्यदि भाति हन्त भवतस्तत्राप्यखण्डं महः ।
नो चेन्नास्ति तदेवमप्युभयथा निर्व्याजनिर्मन्त्रणां
त्वय्याद्विप्रभातिमत्वस्ति माहिमा नित्यप्रबुद्धो भवः ॥५॥

दृष्टिं बहिः प्राहिणु लक्ष्यमध्यान्तरिक्तं (त्यं)
स्याद्वैरव्यानुकरणं बत वांच (वाञ्छ) नीयम् ।
निर्द्वन्द्वबोधमयानस्य न बाह्यमस्ति
नाम्यन्तरं निरवकाशविकासधाम्नः ॥ ६ ॥

वाक्तत्त्वप्रभराविभ्रमोदये यच्छलत्साति तत्तदीक्षताम् ।
आदिमध्यनिधनेषु तत्र चेद् भाति भाति तव लीयतेऽखिलम् ॥

मोहो दुःखवितर्कतर्कणध्वनो हेतुप्रथानन्तर-
प्रोद्यत (न्त) स्खलुरुद्धूलानिबहलो गन्धर्वपुः सन्निभः ।
द्वैताद्वैतविकल्पनाश्रयपदे विद्योऽस्मि नाभाति चेत्
कुत्रान्यत्र तु कस्तु परमानिष्ठा स्यनेकात्मता ॥ ८ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वप्ने तावदसत्यमेव मरणं सौषुप्तयामक्रिया
नैवास्यास्ति तदुत्तरे निरुपधौ चे(चि)द्व्योम्नि कोऽस्य ग्रहः ।
जाग्रत्येव यदावभासि(व)वदथ स्या(त्)च्चेत्क्षणे कुत्रचिद्
भातेनापि तदत्यये दृश्यमिदं तत्रापि का खण्डना ॥८॥
ये ये केऽपि प्रकाशा मयि सति परमव्योम्नि लब्धावकाशाः
काशन्ते तेषु यत्ये महिमनि मम भो निर्विभागे विभान्ति ।
सोऽहं निर्व्याजनित्यप्रतिहतकलनानन्तसत्यस्वतन्त्र-
ध्वस्तद्वैताद्वयादिद्वयमयातिनिरपारबोधप्रकाशः ॥१०॥
कामः संकल्प(ल)मन् कलाः कलयतु स्रष्टा सृजत्वादरा-
दाद्यामाः परतन्त्रतामुपगतो मज्जातु वा मन्मथः ।
क्रीडाडम्बरमम्बरस्थयामिव स्वोल्लोरपरेरवाक्रमं
देहाध्यासमयमस्ववैकृतिमहामोहो न पश्यामि किम् ॥११॥
कः कोऽत्र योर्यं कवलीकरोमि कः कोऽत्र योर्यं सहसा निहन्मि
कः कोऽत्र योर्यं परबोधयाम संचर्वणोन्मत्ततनुः पिबामि ॥१२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

भवेभभयभङ्गदङ्गदक्षशृगालविद्रावणं
प्रबोधधुरि धीरतामसकृदुद्यदुद्दीपयत् ।
स्वध्यानमहनाटवीविहरणातितृप्यङ्गदा-
दमोदहरिबृंहितं व्यधितरस्य देवो हरिः ॥१३॥

इति परमाक्षपञ्चादशिका समाप्ता

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परमार्चनत्रिंशिका

ॐ नमः शिवाय ॐ ॐ

स्नानपूजनसमाधिभिः क्रमाद्यन्महात्मभिरवाप्यते पदम् ।
कैश्चिदक्रमत एव यन्मया तत्समर्चनमिषेण कथ्यते ॥ १॥
बालिकारचितवस्त्रपुत्रिकाक्रीडनेन सदृशं तदर्चनम् ।
यत्र शाम्यति मनो न निर्मलं स्फीतचिज्जलधिमध्यमाश्रितम् ॥
किं तदर्चनमनल्पकल्पनाजालशाम्बरनिपातितात्मनाम् ।
चि- ख. यत्र नास्ति सविकल्पनोत्थि(त्थि)तः स्फीतसौख्यशिवसङ्गमोत्सवः
मन- ख. अप्रयत्नमनिकेतनं पदं दिव्यमाप्य तरसैव वृत्तयः ।
यत्र यान्ति विलयं न सर्वतः किं तदर्चनमसौ पराभवः ॥ ४॥
र्व(र्भ)- ख. यत्र वर्षति न खेचरीस्थितिश्चित्सुधारसभरौघनिर्वरम् ।
देहचित्तपरिपीतनावहं किं तदर्चनमसौ पराभवः ॥ ५॥
नू- ख. खेचरीप्रभृतिपञ्चकात्मना व्याप्तिमम्बरगतां निभालयम् ।
म- ख. ह्लादिकास्तसुभगां पवापदो यत्र मुञ्चति न किं तदर्चनम् ॥ ६॥

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५४)

स्वच्छन्दपरमनोहरेक्षणः प्रोल्लसत्पुलककल्पिताननः ।
यद्यपां भुवमनल्पसम्पदं यत्र नाश्नयति किं तदर्चनम् ॥६॥ - ख.

यत्र साहससमाधिसंभ्रमः प्रस्फुरद्विमलबोधनिर्भरः ।
स्फीतसंविदुदयं न विन्दते सर्ववृत्तिषु किमेतदर्चनम् ॥७॥
विश्वसंहृतिरसैकतत्परो लोलिहानरसनाकुलो मयः ।
यत्र चिद्धिरविशिखा भुज्यते लीलयैव न किमेतदर्चनम् ॥८॥
मानमेयमितिकल्पनोज्झितो निर्विकारमनिकेतनः शिवः ।
गाढगाढमवगाह्यते क्षणान्नैव यत्र ननु किं तदर्चनम् ॥९॥
व्योमकल्पममितं निजं वपुर्वीक्ष्य चित्परसुधारसाप्लुतम् ।
हृ- ख. स्वात्मनात्मनि निरस्तकल्मषो यत्र ह्य(हृ)ष्यति न किं तदर्चन
निर्निकेतनिरुपाधिनिर्मलस्फारचिद्रविमरीचिसंचयैः ।
विश्वमारचितमीक्ष्य विस्मयं यत्र नाश्नयति किं तदर्चनम् ॥
यत्र नित्यपरहर्षनिर्भरस्फीतसुधारसनिपातघूर्णितः ।
ध्यानयोगकलनासु लज्जते नीरसासु न किमेतदर्चनम् ॥१२॥
शक्तिविस्तरविमर्शविस्फुरत्कन्दयुग्मयुगपद्विगाहनात् ।
भैरवं वपुरुदारचोज्झितं यत्र न स्फुरति किं तदर्चनम् ॥१३॥
इन्द्रियेषु विषयानुवर्तिषु प्राणवर्त्मनि निजप्रवाहके ।
कापि निर्वृतिमयी चिदूर्जिता यत्र नोल्लसति किं तदर्चनम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दिव्यरत्नरचना विभूषया नादबिन्दुमयभावसंचयम् ।
यत्र शुष्कमिव पावकस्तृणं न क्षयं नयति किं तदर्चनम् ॥१५॥
शान्तिमेति न विकल्पविप्लवाश्चिच्चमत्कृतिरसो न वर्धते ।
लुप्यते न घनवासनावनं क्वापि तृप्तिरसदा न जायते ॥१६॥
मन्यते न कृतकृत्यतां मनो द्वैतमेधतितरां न भिद्यते ।
दो-ख. यत्र दे(दो)षशतसंकुलं मनो न प्रसीदति किमेतदर्चनम् ॥१७॥
चिन्मयः स्फुरति भारती परां शक्तिमच्छविमयां प्रबोधयन् ।
मन्त्रवीर्यममितं निसर्गतो यत्र नाश्रयाति किं तदर्चनम् ॥१८॥
जनुं-ख. निर्विकारमजरं निरामयं निर्विकल्पमजडं निजं वपुः । जां-ख.
वीक्ष्य जन्ममरणोदितं भयं यत्र मुञ्चति न किं तदर्चनम् ॥१९॥
शान्तवीचिचयहृदयसिन्धुमालिनीं सर्वसंविदुदयावनिं पराम् ।
सृष्टिसंस्थितिलयप्रथाकृतिभिर्विश्वसुन्दरविवर्तवर्तिनीम् ॥२०॥
यर-ख. शक्तिचक्रप्रथमाधिदेवतामम्बरप्रथमम्बिकामजाम् । म्ब-ख.
मङ्गलामसममन्त्रमातरं यत्र पश्यति न किं तदर्चनम् ॥२१॥
सु-ख. सोमसूर्यदहनेन्धनोद्यतस्फीतचि~~ज्जलचि~~ज्ज्वलनदीप्तिभास्वरः
क्ष्य-ख. दुर्निरीक्षगतिरक्रमः शिवो भाति यत्र न किमेतदर्चनम् ॥२२॥
नि न-ख. आत्मनात्मन निजानते विधिं निस्तरङ्गपरबोधधामगाः ।
यत्पदस्थितिजुषो महाजना मुक्तिसंसृतिसमानबुद्धयः ॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यद्यदापतति वेद्यतामुखं तेन तेन ननु याद्भिरर्जितम् ।
नित्यनिर्मलसमाधिभूमयो यत्पदे विगतिकालकल्पनाः ॥२४॥
यद्विशृङ्खलमहोदयोल्लसच्छक्तिपातवशतो विजृम्भते ।
तत्पदं यदि गुरुप्रसादतो लब्धमुत्तममथार्चितः शिवः ॥२५॥
१-ख. भवसंचयविमुक्तविग्रहा विश्वमप्यपि परा प्रथात्मिका ।
कापि संविदमलाम्बरप्रभा जृम्भते यदि तदार्चितः शिवः ॥२६॥
किञ्चनापि न च मुच्यते क्वचित्किञ्चनापि न च गृह्यते क्वचित् ।
दि-ख. स्वं वपुर्विमलबोधनिर्भरं दृश्यते यदप(दि) तदार्चितः शिवः ॥२७॥
यते-ख. भैरवा विविधकल्पनात्मकाः प्रोल्लसन्ति बहवो यतोऽम्बिका ।
सा यतः स्फुरति तत्परं पदं भाति चेद् गुरुदृशा शिवोऽर्चितः ॥२८॥
आसादितं गुरुमुखादिदमप्रयत्न-
ध्म-ख. सिद्धं शिवार्चनमपास्तसाधिपादबाध्यम् ।
यत्नमया निगदितं तदनल्पवाञ्छा-
संबोधनाय सुधियां शिवशक्तिभाजाम् ॥२९॥
अनवच्छिन्नचिद्व्योमपरमामृतबृंहितः ।
शिका-ख. नागाधियो व्यधादेतां परमार्चनत्रिंशकम् ॥३०॥
शि-ख. ॥ इति परमार्चनत्रिंशका समाप्ता शुभं चेति मङ्गलम् ॥
नास्ति-ख.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
सरस्वतीभवन ८४०८०

चित्तसन्तोषत्रिंशिका

ॐ नमः शिवाय

ॐ कामी यथा गणयतीह हठानुरागो
जीवं निजं तृणमिव द्रविणं च तद्वत् ।
नैव श्रमं न गृहकर्म न लोकगर्हां
त्वद्भक्तिरस्तु मम नाथ तथाविधैव ॥१॥

ॐ लोकोत्तरानुपमसस्मितपूर्णमात्र-
स्वानन्दसुन्दरविनिर्मलनिर्निमेषा ।
यत्स्मारतः पशुरपीश्वरतामुपैति
सा कापि दृग् विजयते गुरुपुङ्गवानाम् ॥२॥

दिष्ट्या भवानलशिखाशततापतप्तं
जन्माटवीषु विषयासु कदर्थितं यत् ।
चेतस्तदेतदधुनामलचित्सुधाब्धि-
मध्ये निमग्नमसमां भजते प्रशान्तिम् ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्यामूढमन्धमिव संशयदोषदुष्टं
चेतो यदेतदभवद् भवदुःखपात्रम् ।
जातं तदद्य गुरुपादसरोजसेवा-
संजातनिर्मलविबोधमहाप्रकाशात् ॥४॥

संकोचमाश्रितवतो निबिडं विमोहाद्
यस्याभवद्भयमिहेन्द्रियपन्नगेभ्यः ।
चेतस्तदाप्यविमलोर्जितसंविदाहं
निःशङ्कमद्य रमते विषमाटवीषु ॥५॥

कन्दर्पबाणविषमं हरिणेक्षणाभिः
पीतं हृतं कवलितं मुषितं यदासीत् ।
तत्पात्रतामुपगतं परमोक्षलक्ष्मी-
प्रेमामृताप्लुतकटाक्षपरम्पराणाम् ॥६॥

लिष्टं यदेतदभवज्जुपकष्टयोगा-
प्राणप्रवाहविनिरोधकदर्थनाभिः ।
चेतस्तदद्य परमात्मसामरस्य-
संजातसंमदरसास्वदनमास्ते ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यो भेदनीव्रातशीशिरप्रसमोपघात-

भीतो मनोमधुकरो हृतशक्तिरासीत् ।

आसाद्य सोऽस्य शिवपादपयुं सदाऽस्ते

संविल्लताकुस(सु)मसौरभपानमत्तः ॥ ८॥

यत्क स्वतन्त्रनिजरूपमहत्प्रभावं

यत्कर्मबिन्दुधरणीषु निलीनमासीत् ।

स्वच्छप्रभाप्रसरपूरितसर्वलोकं

चेद(त)श्चिदम्बरपदे न तदस्य भाति ॥ ९॥

यत्नेन वाञ्छितमनल्पविकल्पजाल-

विच्छेति(त्ति)रस्फुटमवाप न यत्प्रवेशाद् ।

दुर्भेदभिन्नविभमार्गलभिन्नमार्गि

चेदस्तदस्य रमते शिवमन्दिरान्तः ॥ १०॥

योगव्रतादिनियमैरुपसेवितापि

नोजाप दर्शनमयं किल यस्य जातु ।

सेवितस्तिमा सुभगमूर्जितभाग्यसम्प-

च्चेतस(स्त)दस्य न जहाति मुहूर्तमेकम् ॥११॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दुःखैकसार इति जीव इति प्रयत्नात्
संसार एष किल यस्य बभूव हेयः ।
दिष्ट्या स एव परचित्प्रसरामरस्य-
संजीवितः श्रयति तस्य विमुक्तिसाम्यम् ॥१२॥
तृष्णाकरालकरवालविलुप्यमानं
यद्धि स्मृतात्मविभवं कृणंप (पणं) बभूव ।
उच्चैरकिञ्चनतयापि तदद्य चेतः
स्वात्मावमर्शपरहर्षमुदारमास्ते ॥१३॥
कस्योर्जितस्य सुकृतस्य फलं तदेतत्
पुण्योदयस्तव कुतोऽयमनन्यलभ्यः ।
संविच्छ्रिया गलितभेदविकल्पयाव-
देकं मुहूर्तमपि नैव विमुच्यसे त्वम् ॥१४॥
वर्तामहे क्वचन तावन्न चित्त# दिष्ट्या
वर्त्यामहे स्वयमहो मुदिता भवामः ।
यत्त्वां स्मरेव परनिरुत्तरशैवसम्प-
संभोगमन्थरतरं परिलोकयामः ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ध्यानेऽर्चनेऽपि न कदाञ्चन काऽञ्चनापि
कुत्रापि निर्वृतिदशां बत यन्त्रलोभे ।
दिष्ट्या निमग्नमपि संव्यवहारमध्ये
चेतस्तदद्य न विमुञ्चति पारिपूर्ण्यम् ॥१६॥

सर्वेषु चित्तमधुपो विषयप्रसूनेषु
बभ्राम यः सततमस्तमितापिलाषः ।
दैवादवाप्य परमेश्वरपारिजातं
तस्मिन् विलीन इव मुञ्चति चञ्चलत्वम् ॥१७॥

यैरिन्द्रियैरसि वशीकृत शाङ्कि चेतः
पूर्वं कदर्थितमपूर्वहितैररिवोच्चैः ।
स्वच्छानिकेतपरचित्प्रसरं विभज्य
दिष्ट्याद्य तैरनुचरैरिव राजसे त्वम् ॥१८॥

चित्तं ततान करुणं प्रलपाप पूर्वं
यत्संकुचत्स्थितिमयं हृदि जाड्यचार्य ।
चेतस्तदद्य यदिदं निजरूपमीक्ष्य
दिष्ट्याद्य निर्भयममन्दमुदात्तमास्ते ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नित्यं यदेतदमवाप्तिफलप्रयासं

हेवाकदुर्ललितमप्रार्थितात्मभावम् ।

संवित्सुधारसचमत्कृतिघूर्णमानं

दिष्ट्या तदद्य नितरां स्पृहणीयमास्ते ॥२०॥

चिन्ताशताकुलतरं न रतिं कदाचिद्

भीतं भवादभजतैकदापि क्षणं यत् ।

चेतश्चिदात्मकमिदं सकलं विलोक्य

सुप्तप्रबुद्धमिव निर्वृतरूपमास्ते ॥२१॥

वन्दामहे किमु नुमः किमु गौरवेण

हर्षेण चित्त किमु नाम न पीडयामः ।

संप्राप्तदुर्लभमहोदयशैवसम्पत्

त्वां कौतुकेन किमु मित्र विलोकयामः ॥२२॥

आपृच्छ्यतामियमनादिभवप्रबन्ध-

स्नेहानुबिद्धहृदया हृदयाऽद्य माया ।

संसेव्यतां सुभगशैवपदप्रवेश-

संप्राप्तदुर्लभमहोदयमुक्तिलक्ष्मीः ॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किं ब्रूमहेऽत्र भवते सुकृतेन मन्ये
सर्वाधिबाधाविषये ननु वर्तसे त्वम् ।
यत्कारणाधिगतनिर्मलनिर्विकल्प-
स्वच्छन्दशङ्करपदे भजसेऽनुरागम् ॥२४॥
चित्रं तदेतदसमं यदभूत् सुखेषु
प्राप्तेष्वनिर्वृतिदशामनुवर्तमानम् ।
दुःखेषु दुस्सहतरेष्वपि चित्तमथ
पूर्णप्रमोदरसनिर्भरमेतदास्ते ॥२५॥
विश्वं गिरीश सहसा कवलं विधाय
कालं प्रशान्तगगनोपमयादिव्यमूर्तिः ।
या राजते निरुपमाऽमृतपूरपूर्णा
सा कापि खेचरगतिर्जयति त्वदीया ॥२६॥
ते कारणाधिपतयः प्रलयं प्रयान्ति
यस्मिन् महावरतटे विषमे गभीरे ।
शक्तिर्निजं वपुरपि प्रसभं जुहोति
तद्धाम संश्रयसि वीरवर त्वमेकम् ॥२७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विद्युद्विलासचपले विभवे नताङ्गी
त्रिभङ्गभङ्गुरतरेऽपि च जीवितेऽस्मिन् ।
चित्तं त्वयैव विजितं प्रमताऽविनाशि
दिग्देशकालकलनां रहितं पदं तत् ॥२८॥

स्वस्त्यस्तु तेऽस्वरविकस्वरसम्प्रदाय-
संप्राप्तशङ्करपदोदितसम्प्रदाय ।
दुर्वारसंसृतिदशास्वपि निर्विकार-
नित्योदितात्मविभवाय भवाभयाय ॥२९॥

स्वच्छस्वनिर्मलसदोदितनिर्निकेत-
संवित्सुधारसचमत्कृतिनिर्भरोऽसि ।
दिष्ट्याद्य सद्गुरुमुखाम्बुजमध्यलब्धा-
नुत्कार्थचारुकथनोदयविस्मितोऽसि ॥३०॥

भवभरभुवि भ्रान्तो मोहाद्य एव मनोरथैर्
विषमविषयग्रीष्मतृष्णानिवेशवशीकृतः ।
शिवपदसुधासिन्धुं दैवादवाप्य स सादरं
किमपि सुखितो मज्जंमज्जं निमज्जति साम्प्रतम् ॥३१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निरावरणचिद्भोगपरमामृतनिर्भरः ।
नागाभिधानस्तदिदं चित्तसन्तोषकं व्यधात् ॥३२॥

॥ इति श्रीचित्तसन्तोषत्रिंशिका समाप्ता ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तिस्तोत्रम्

॥ ॐ स्वस्ति । ॐ नमो भगवते वासुदेवाय ॥

ॐ प्रत्यक्षवस्तुविषयाय जगद्धिताय
विश्वस्थितिप्रलयसम्भवकारणाय ।
सर्वात्मने विजितकोपमनोभवाय
तुभ्यं नमस्त्रिभुवनप्रभवे शिवाय ॥१॥

सत्यं न वेद्मि किमहं यदगोचरोऽसि
वाचस्पतेरपि गिरां किमुताल्पधादेः ।
भक्तिस्तथापि भवतो गुणकीर्तनेषु
मन्मां नियोजयति किं तदहं करोमि ॥२॥

(कें)
खार्केन्दुवह्निमरुदात्ममहीपयोधी-
(स्तो)
रष्टाभिरेव तनुभिर्भवता समस्तम् ।
व्याप्ते जगत्यपरमिच्छति योऽत्र वक्तुं
कोऽन्योऽत्र तत्र पतया सदृशोऽस्ति तेन ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धृत्यादिभिः स्वतनुवृत्तिभिरेव यद्वद्-

देहो भवान् वहति सम्प्रति लोकयात्राम् ।

तद्वद्विभो यदि जगत्यपरोऽस्ति कश्चि-

न्निर्मत्सराः किमपि न प्रवदन्ति सन्तः ॥४॥

(स्त)
योगादयास्तु तमसो भुवनत्रयेऽपि

मुख्याः पितामहपुरन्दरविष्णवोऽपि ।

अद्यापि देव न विदन्ति कृतप्रयत्ना-

स्तत्त्वं तवेति तदहो महदिन्द्रजालम् ॥५॥

भावोद्भवस्थितिविपत्करणप्रवृत्तौ

संहारकैर्भिन्नरचनाकृतयोऽपि सम्भवन्ति ।

(तः)
साम्ये स्थिताः प्रतिनिवृत्तसमस्तकार्यो

नेन्द्रो न विष्णुरसि नापि पितामहोऽसि ॥६॥

(म)
केचिद् भवन्तमनुपाधि सनातनरूपं

विज्ञानमेव परमार्थतया प्रपन्नाः ।

अन्ये त्रिधातुपरिकल्पनया विशुद्धं

भूताः स्वशरणसमयं परिपालयन्तु ॥७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

(रम्यैः)

सोऽस्या, समस्तजगदुद्भवकारणानि
प्रोक्तानि यानि खलु सत्त्वरजस्तमांसि ।
रूपाणि तान्यपि तवैव समग्रशक्तेः
किं तत्र यत्परिगतं भुवि शक्तिभिस्ते ॥८॥

नित्यं विनाशिपदरूपमनेकमेक-
#मुग्रं प्रशान्तमगुणं गुणसंनिबद्धम् ।
संसारिणं वशिनमध्रुवमस्वतन्त्रं
देवं भवन्तमसकृत् कवयः स्तुवन्ति ॥९॥

वाचामतीतविषयो निरुपाख्यभावात्
प्रोक्तोऽसि शून्यमिति कैश्चिदस(दस)त्प्रतिज्ञैः ।
त्वामेव केचिदपि वाच्यकवाच्ययोगात्
सत्त्वं विशेषणवशात् परिकल्पयन्ति ॥१०॥

आद्यन्तयोस्त्रिभुवनस्य भवन्तमेव
यं वैदिकाः पुरुषमाहुरमेयमाद्यम् ।
भूयस्तमेव जननप्रलयान्तराले
संसारजालमिति जातविकारभूमा(मा:)(चूडाः)॥११॥

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आत्मानमात्मनि यदा स्वयमात्मनैव (क्तिः ? क्ते)

संयस्य(म्य) तिष्ठसि निमीलितसर्वशक्ते: ।

लीनं तदा त्वयि जगत्खलु तावदास्ते

यावन्नवोद्भवति नाथ पुनः सिसृक्षा ॥१२॥

त्वत्तः परं जगति नाथ न चास्ति किञ्चि-

न्नाणुः क्वचिन्न च महान् भवतः सकाशात् ।

सर्वात्मकोऽसि भवतैव समस्तमेत-

दत्तः कृतं ननु जगन्मणिनेव सूत्रम् ॥१३॥

चेतांसि यानि सुखदुःखविशेषभाञ्जि

ये च प्रधानपरिणामविकारभेदाः ।

त्वं देव जन्मनि पुनः प्रलये च तेषां

हेतुः समस्तपयसामिव तोयराशीः ॥१४॥

अस्मात्त्वया सुमुखे स्वतनौ यदैवं

खात्मानलानिलजलावनिचन्द्रसूर्याद्(र्याः) ।

लोके परस्य भवता ननु कारणस्य

मूले तदैव निहितः सकले कुठारः ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्तौति प्रसह्य तव षोडशधा विभज्य

(मु)
मूर्तिप्रमाणरचनौसु निरक्षपादः ।

द्रव्याणि वस्तुरचनाभिरूपा तु भेदे

(सि)
वैशेषिके कणभुजाऽपि ननु स्तुतोऽसि ॥१६॥

बध्नाति काञ्चिदपि शक्तिरनन्तशक्तेः

क्षेत्रज्ञं स(म) प्रतिहता भवपाशजालैः ।

ज्ञानासिना च विनिकृत्य गुणान्तरोधा-

नन्यं करोत्यभिमुखं पुरुषं विमुक्तौ ॥१७॥

एकां वत च्युतसमस्तभवप्रवृत्ति-

माहुर्विमुक्तिमिति शान्ततमामवस्थाम् ।

स्थित्युद्भवप्रलयिनीमपरामवस्थां

संसारिणीमिति वदन्ति तवैव सन्तः ॥१८॥

आ(अ)ज्ञानतीव्रतिमिरोपहतप्रकाशा-

स्त्वद्दूषणं प्रति विनष्टधियोऽपि सन्तः ।

(वं)
तावत् त्यजन्ति न भवं भगवास्तवैव

(र्नं) (धि)
यावत् स्वशक्तिविभवैन्न विबोधुताः स्युः ॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुह्यं गुहाशयपदं परमं पवित्र-

मेकं विभुं सकलवाङ्मयबीजमाद्यम् ।

सम्यक्षमुक्तमभिवाञ्छितहेतुभूत-

माहुर्भवन्तमपरे ननु शब्दतत्त्वम् ॥२०॥

तीर्थक्रियाव्यसनिनः स्वमनीषिकाभि-

रुत्प्रेक्ष्य तत्त्वमिति यद्यदमी वदन्ति ।

क्रिया-प. तत्तत्त्वमेव भवतोऽस्ति न कान्चिदन्यत्

संज्ञासु केवलमयं विदुषां विवादः ॥२१॥

सर्वज्ञबीजमविकारमलुप्तशक्ति-

निःश्रेयसाभ्युदयमार्गविधानहेतुम् ।

त्वामेव देव गुरवः प्रथमेऽपि समय-

माराध्य तीर्थकरमाद्यमिमानमाहुः ॥२२॥

सर्वज्ञता यदि लक्षणमापरस्य

युज्या तथापि भवतः परमेश्वरत्वात् ।

स्वातन्त्र्यमप्यनुपचारमुपैति योगं

त्वय्येव नाथ जगतः खलु कर्तृभावात् ॥२३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृश्येन कश्चिदधिगच्छति वस्तुजात-

मन्योऽनुमानसमयैरपरोऽपि शब्दैः ।

(त्तु)

प्रत्यक्षवत्तु भवतः पुनरक्रमेण

सर्वं करामलकवद्विदितं प्रमेयम् ॥२४॥

अस्यात्मनो विषयिणः परतन्त्रवृत्ते-

(तः) (स्याः ? परायाः)

रस्याश्च नाद्यजगत् प्रकृतेः परस्यः ।

(तुः)

संयोजने च विरतौ च परोऽसि हेतु-

संसारचक्रपरिवर्तनयन्त्रवाहः ॥२५॥

कुर्वन् मुहुः स्वयमतान्द्रितयापि बुद्ध्या

कर्माणि शास्त्रसमयोपनिबन्धनानि ।

संभुज्यते समुचितेन तु यत्फलेन

(-चै)

तच्चोदितस्य फलमप्रतिमं तवैव ॥२६॥

उत्साहशक्तिरहितान् विकलाननुच्छयन्

(न्)

मन्दा निरस्तसमयानघृणानसत्यान् ।

अवाञ्छितेन विनियोजयता फलेन

लुप्तस्त्वया पुरुषकारविशेषवादः ॥२७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(सु)

कर्माणि वेदविहितानि सुखप्रदानि

(त्त्व)

प्रेत्यैति तत्फलमिदं फलमन्तवच्च ।

त्वच्छासने सुखमनन्तमशेषदोष-

लोपाय यत्किविहितां प्रणतिं यदाहुः ॥ २८॥

स्वाभ्युपगमान्यानि यदा प्रकटीकरोषि

अन्यैः प्रतिक्षणमनेकविधा दधानः ।

त्वय्येव सोऽपि भगवन् भजतेऽर्थवत्तां

प्रायो विदग्धरचितः क्षणभङ्गवादः ॥२९॥

(र्ज)

य(त्) तीर्थिकैर्जगति जन्मभिरप्रमेयै-

(र्ना)

र्नाप्तायते यदमीति स्वमतेषु गीतम् ।

बुद्धैकजन्मिकमिति ध्रुवतां किरन्य

मेषां त्वया ननु कृतश्चरणः शिरस्सु ॥ ३०॥

(स)

लुब्धा मलीमनधियः समयादपेता

(सो)

रागोपरक्तमनसौ वाशिनोऽप्यसन्तः ।

त्वच्छासने विहितलिङ्गपरिग्रहेण

मुच्यन्त इत्यतिमहांस्तव सिंहनादः ॥ ३१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अव्याहतस्य भगवन् भवदागमस्य
चिन्तामणेरिव महानसमः प्रभावः ।
सम्यग्विधानविहितां भवदाप्य दीक्षां
(दृ)
ज्ञानामृतेऽपि खलु केवलतामुपैति ॥३२॥

ज्ञानं तिरस्कृतमिदं पशुवासनाभि-
र्यस्तां मदात्मनि विमुक्तिफलस्य बीजम् ।
(व)
तद्धारिणेन भगवन् भवदागमेन
सम्पादितं भवति मोक्षफलप्रसूत्यै ॥३३॥

जन्तौ यदा तव कदाचिदनु(नु)ग्रहेच्छा
क्षीणाशये भवति जन्मभिरप्रमेयैः ।
संसारजालमतिवाह्य तदैव याति -
मात्यन्तिकं(कीं) व्रजति बोधविवर्जितोऽपि ॥३४॥

एतच्चतुर्दशविधं भुवनं समस्तं
संसारमण्डलमवान्तरभेदभिन्नम् ।
त्वं पासि हंसि विदधासि यदृच्छयेति
सत्वा न लिप्यत इति प्रवदन्ति सन्तः ॥३५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ऐश्वर्यमप्रतिहतं सहजो विराग-
स्तृप्तिर्निसर्गजनिता वशितेन्द्रियेषु ।
आत्यन्तिकं सुखमनावरणा च शक्ति-
र्ज्ञानं च सर्वविषयं भगवंस्तवैव ॥ ३६॥
(त्त) .(य)-
यत्नादुपात्तु तपसोऽपि हि यद्दुराप
(मा) (स्त)
सात्यन्तिकं सुखमपास्तु समस्तदुःखम् ।
(ष्ट्र)
नीताः स्वरोष्टुतरवोऽपि यदित्यहो ते
स्वातन्त्र्यमप्रतिहतं भुवनत्रयेऽपि ॥३७॥
येनामलस्फुरितरत्नशिखाविताना
हेमीकृतो निपतता सकलः सुमेरुः ।
तस्यातुलं फलमिदं तव शुक्रबिन्दो-
रेकस्य यत्कनकभूषणमाप लोकः ॥ ३८॥
कालेन संचितमपुण्यमनन्तकल्पं
लोकत्रयस्य यदभूत् त्रिपुरप्रकारम् ।
दग्धं त्वया तदिति सम्यगवेत्य कस्य
मूढादृते भवति न त्वयि पक्षपातः ॥३९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षीरोदसागरमथनप्राप्तिलब्धजन्म
विश्वासितत्रिदशसंहति कालकूटम् ।
निर्मत्सरेण पिबता जाते(तो) हिताय
पीतस्त्वयैव सकलो ननु साधुवादः ॥४०॥

शान्तात्मनापि भगवन् भवता प्रसह्य
नेत्रोद्भवेन दहता दहनेन कामम् ।
आत्मीयसोऽपि महतां समतिक्रमस्य
मन्ये जनाय विबुधः कथितो विपाकः ॥४१॥

स्नेहाद्विधाय दयितां वपुषोऽर्धभागे
भूयस्तथापि भगवान् शमिता(तां) त्वयैव ।
त्रैलोक्यविस्मयकृतां तव चेष्टिताना-
मद्यापि कश्चिदपि नानुकृतिं करोति ॥४२॥

लक्ष्यैस्तिरस्कृतमिदं भुवनं समस्तं
योगप्रभावजनितेन बलेन येन ।
तस्य प्रजापतिसुतस्य हतः प्रसह्य
गर्वस्त्वयेति बत कस्य न विस्मयोऽत्र ॥४३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अङ्कुञ्छकेन भवता निजिपीडितस्य
यस्याश्रवो न विगतः(ता) महदा कदाञ्चित् ।
यत्तान्य(त्म) एव हरिणा विजिताच्चिरेण्य
नीत्या दशानन इति क न विस्मयोऽयम् ॥४४॥
मन्दाकिनीकनकपङ्कजपारिजात-
पुष्पाधिवासितजला नभसः पतन्ती ।
लग्ना तुषारकणिकेव जटय(टा)ग्रभागे
केनापरेण भवतेव धृताऽनुगृह्य ॥४५॥
आस्तां तवान्यदपि तावदतुल्यकस्य-
दैश्वर्यमीश्वरपदस्य निमित्तभूतम् ।
त्वच्छेन सोऽपि भगवन्न गतोऽवसानं
विष्णुपिता महमतः किमुतापरस्य ॥४६॥
जैतस्य मृत्युदशनातुरवर्तिनोऽपि
सूनाप्रशोरिव बधावसरे स्थितस्य ।
त्राणाति गृह्य भवता यदकारि तस्य
तत्कस्य विस्मयभरं न करोति लोके ॥४७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रीत्यै न य त्वदुपमन्युरुपात्तमन्युः
क्षीरोदसंविभजनेन कृतस्तवयाऽसौ ।
तद्भाविनो यदि जगत्यपरोऽस्ति कश्चि-
न्निर्दिश्य मत्सरमयी प्रवदन्तु सन्तः ॥४८॥
वृत्रद्विषः सकुलिशस्य भुजस्य शक्ति-
रुत्तम्भिता विहसता भवता यथैव ।
पूष्णस्तथैव दशनेषु भगस्य चाक्ष्णो-
र्दक्षस्य च क्रतुफले सपतानि - - - ॥४९॥
विष्णुप्रजापतिपुरन्दरलोकपालै-
स्त्रिभव सुरासुरनरैरपरैश्च दिव्यैः ।
लोके यथा पशुपते तव कल्पितानि
स्थानानि तद्वदपरस्य वदन्तु कस्य ॥५०॥
शक्रात्मजस्य निजशङ्करथाङ्गपाणौ
कृष्णे स्थितेऽपि शकलीकृतदानवेन्द्रे ।
द्रोणाश्वत्थकृपकर्णभयार्दितस्य
शं शङ्कर त्वमकृथाभ्यशमर्जुनस्य ॥५१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आराधितेन भगवन् भवता हिरण्य-
वृष्टिं मरुत्तनृपतेः किरता यियक्षोः ।
ये ख्यापिता जगति भक्तजनप्रसादा-
स्तत्राद्भुतं तव विभो परमेश्वरत्वम् ॥५२॥
तीव्रव्रतस्य कणधूमनिपाततस्त
सर्वेन्द्रियस्य भवता भृगुनन्दनस्य ।
तुष्टेन शंसपदकारि तदा स शुक्रः
शीतोष्णवातजलदैर्दिवि भासमानः ॥५३॥
एतानि भासि भुवनानि यथा विभास्य
तेषां विभूतिरतुला तव तावदास्ताम् ।
दक्षप्रसूतिरपि ते भुवनत्रयेऽस्मिन्
कश्चिन्न वेत्ति भवता सह को विवादः ॥५४॥
तन्मार्गवर्तिगुणदोषविवेकमन्द-
मुग्धं मलीमसमसंयतमल्पसारम् ।
भीतार्तिनाशन दयापर लोकनाथ
देव प्रसीद मम चित्तमिदं प्रशाधि ॥५५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतानि नाथ चपलानि दुराशयानि
लब्धानि रम्यविषयोपनिबन्धनानि ।
दुर्दान्तवाजिसदृशान्यविधेयभावाद्
वश्यानि मे कुरु सदैव ज्ञानेन्द्रियाणि ॥५६॥
नन्दीश्वरस्य मनुजस्य सतोऽतिकष्टं
कालेन मृत्युमाचिरेण निजीवितस्य ।
सर्वात्मनात्मसमता मदकारि तुष्ट्या-
त्वाश्रिप मेतदपवर्ग च भावि नास्ति ॥५७॥
संसारपाशवशमेतदनीशमीश
मिथ्याकुतर्कतिमिरोपहतप्रकाशम् ।
चेतो समर्पितमनर्थदग्धकाल
सत्कोविते पथि नियोजयन् देवदेव ॥५८॥
कालानुबन्धिभिरनेकविधैरुपायै
रागादिभिश्च मनांसि प्रतिलभ्यमानैः ।
मूढः पृथक् पृथगहं प्रविलुप्यमान-
स्त्वत्तः परं कथय कं शरणं व्रजामि ॥५९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आयासकेन खलु कामपिशाचकेन
क्रोधग्रहेण च दुरन्तिरवग्रहेण ।
ग्रस्तस्य विक्लवधियः प्रविमुक्तिहेतो -
र्यत्कृत्यमत्र मम तत्र तवैव शक्तिः ॥ ६० ॥

या सा जगत्परिभवस्य निमित्तभूता
हेतुः स्वयं सुरपतेरपि लाघवस्य ।
सा मां विलम्बयति नाथ सदैव तृष्णां
भिन्धि प्रसह्य भगवन्नपुनर्भवाय ॥ ६१ ॥

येनावृतः पशुरयं हतबोधशक्ति -
(सवं)
स्तानवे न वेत्ति जगते हितमात्मने वा ।
छिन्धि प्रसह्य भगवन् मम तत्तमस्तं -
मद्भाजं तिमिरमस्तु महान् प्रकाशः ॥ ६२ ॥

सर्वापदां निलयमध्रुवमस्वतन्त्र -
मासन्नपातमविवेकमसारमज्ञम् ।
यावच्छरीरकमिदं न विपद्यते मे
तावन्निबोधय विभो कुशलक्रियासु ॥ ६३ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यास्यिष्यते कमलयोनिरपि स्तुवानः
साक्षाच्चतुर्भिरपि नाथ मुखैर्यदन्तम् ।
तत्केवलं तव गुणं स्तवनाक्रियास्तु
भक्तिः प्रमाणमिति सर्वमिदं क्षमस्व ॥६४॥
कृता(त्वा) मया तव नुतिं जगदेकबन्धो
भक्त्या स्वबुद्धिसदृशीमवधूतनाम्ना ।
पुण्यं यदल्पमपि किञ्चिदुपान्त(त्त)मत्र
लोकस्य तेन भगवंस्त्वयि भक्तिरस्तु ॥६५॥

॥ इति श्रीमदवधूतसिद्धकृतं भक्तिस्तोत्रं
समाप्तम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वात्मोपलब्धिशतकम्

ॐ स्वस्ति । ॐ नमः श्रीपरादेव्यै ॥

ॐ अन्तर्विलसितानन्तशक्तिचित्रितमर्चिषे (चर्चिते)
निरस्तसर्वकृत्याय स्वभावमहसे नमः ॥ १॥
नमः स्वानुभवग्राह्यप्रकाशानन्दमूर्तये ।
सर्वभूतान्तरस्थाय नित्याय परमात्मने ॥२॥
उन्मेषमात्रसम्पन्नजगन्निर्माणकेलये ।
नमः स्वतन्त्रतोदग्रपारमैश्वर्यशालिने ॥ ३॥
परापरेण रूपेण स्थावरेषु चरेषु च ।
एकोऽप्यनेकतां यातो भूतग्रामेषु सञ्चरन् ॥४॥
गोपयन्नात्ममानं स्वं मायाशक्तितिरोहितः ।
प्राणपुर्यष्टकाविष्टो मितमातृत्व(द)शां श्रितः ॥५॥
स्थूलभूतशरीरस्थकर्मपञ्जरयन्त्रितः ।
सुखदुःखादिभोक्तासौ भवे विपरिवर्तते ॥६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततः स्नेहादिभिर्भावैर्मोहितः परिकल्पितैः ।
विस्मृत्य निजमात्मानमनात्मनि निमज्जति ॥७॥
मिथ्याभिमानमूढस्य रागोपाचितचेतसः ।
कोऽस्मीति चित्प्रसादर्शो मनागपि न जायते ॥८॥
अनात्मन्यात्मसंवेदलक्षणोऽयमतात्त्विकः ।
अविद्याध्यासितस्यास्य बन्ध इत्युपवर्ण्यते ॥९॥
स तेनापहृतस्फारसर्वज्ञत्वादिवैभवः ।
इयत्तामात्रनिष्ठेन संकोचेनाभिभूयते ॥१०॥
मयेदमित्यसम्बद्धैर्भावैर्व्याधिमयं जनुम् ।
पतत्यगाधसंयोगावियोगैर्विजयावहे ॥११॥
पशुत्वे वर्तमानोऽपि भावैर्भावैर्मुहुर्मुहुः ।
तद्भवस्थितिसंहारान् करोति निजशक्तिभिः ॥१२॥
मायाविद्याकलाकालरागनैयत्यमुद्रितः ।
आविर्भावतिरोभावे विदधाति गतागतम् ॥१३॥
विकल्पाकुलितस्यापि बाह्यावृत्तिजुषोऽपि वा ।
पदे पदे जडितस्य चिद्व्यक्तिर्नोपजायते ॥१४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जडस्वभावा अप्येते बाह्या घटपदादयः ।
प्रकाशरूपतां यान्ति तदन्त(:) प्रतिबिम्बिताः ॥१५॥
हृदयात् सर्वभूतानामग्नीषोमात्मको सदा ।
प्राणापानावधश्चोर्ध्वं प्रेरयन्नवतिष्ठताम् ॥१६॥
स्फुरत्कुण्डलिनीगर्भनादमुद्रानुरोम्भिता ।
उत्प्राणितेव पञ्चाशद्वर्णैश्चरति मातृका ॥१७॥
तन्मरीचिचयोदारस्फारविस्फारितो जडः ।
चेष्टते विषयेष्वन्तर्बहिः करणविस्तरः ॥१८॥
यक्षे(को)पलभते बाह्यान् विषयान् करणक्रमात् ।
जागरूको तदा जाग्रदवस्थास्थोऽयमुच्यते ॥१९॥
शान्तैरिन्द्रियार्थैश्च विनैवानुभवोऽस्य यः ।
प्राक्तनज्ञानसंस्कारात् स्वप्न इत्यभिधीयते ॥२०॥
यदा त्रितयमप्येतदीन्द्रियार्थानुभूतिकम् ।
न संस्पृशति संलीनस्तदा सौषुप्तभाग् भवेत् ॥२१॥
विकल्पैरपरामृष्टा संवित्तिरेव केवला ।
तत्तुर्यं तत्परः शान्तस्तुर्यातीतो निगद्यते ॥२२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

य(इ)च्छेतामिरवस्थाभिरभिमानमदोद्धुरः ।
संसाररङ्गे सरसः शैलूष इव नृत्यति ॥२३॥
विस्मृतस्वात्मभावमेवं कदाचित् पारमेश्वरी ।
शक्तिस्तमनुगृह्णाति निरपेक्षाव चोदिता ॥२४॥
यथार्ककरसम्पर्कादिकसत्येव पङ्कजम् ।
भास्करस्य न सापेक्षा नार्थित्वं कमलस्य वा ॥२५॥
तथैव निरपेक्षिण्या स्वरसोदितया विभोः ।
मोहनिद्राप्रसुप्तोऽपि पशुः शक्त्या प्रबोध्यते ॥२६॥
यथा कलुषमप्यम्भस्तथो याति प्रसन्नताम् ।
कतकस्पर्शसंयोगाच्छक्त्या स्पृष्टस्तथा पशुः ॥२७॥
तया प्रबोधितस्यास्य कोऽपि मोहविषापहः ।
विवेकः समुदेत्यन्तर्हेयोपादेयलक्षणः ॥२८॥
कुतोऽहमागतः कोऽहमवसाने भवामि किम् ।
जन्ममृत्युं(त्यू) कथं कस्य भवतो वा न तौ कथम् ॥२९॥
उपायाः के कथं हानिरस्याविध्यस्यास्य कर्मणः ।
किं हेयं हायते केन कश्च तस्योपदेशकः ॥३०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शरीरं किं शरीरे कः को भोक्ता सुखदुःखयोः।
किं विदित्वा निवर्तेत(ते) आवर्तनविवर्तने ॥३१॥
इति भारतख्यानचर्वणैककुतूहली।
चित्तस्य सहजोदारो विचारः कुरुते पदम् ॥३२॥
विमुक्तव्यवहारस्य भोगेभ्यो विरतस्य च।
स्वल्पसन्तोषशीलस्य वैराग्यमुपजायते ॥३३॥
निसर्गमधुरत्वेन भावानां परिभावयन्।
अनित्यतां न तैस्सारं संगित्वमधिगच्छति ॥३४॥
तीव्रसंसारकान्तारपरिभ्रान्तिकदर्थितः।
वाञ्छति प्रशमास्निग्धच्छायां मस्य मनोमृगः ॥३५॥
आपातरमणीयेषु पदार्थेषु प्रियेष्वपि।
प्रायो वियोगधर्मित्वान्न श्लिष्यति कदाचन ॥३६॥
तस्सौको विषवैनास्य निधिडैरपि जायते।
मुहुरायाति निर्वेदं भोगेषु क्षणभङ्गिषु ॥३७॥
इन्दीवरदलश्रेणीविभ्रमैर्मुनिमोहनैः।
कटाक्षैः पक्ष्मलाक्षीणामस्य नाक्षिप्यते मनः ॥३८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अभिमानं समुत्सृज्य विनयावनतः सदा ।
साधुसंगप्रसङ्गेन विनोदयति मानसम् ॥३९॥
अनिन्द्यादपराधीनादुचितादकदर्थितात् ।
प्राणसन्धारणामात्रां निजवृत्तिं समीहते ॥४०॥
आपन्नदर्शनादेव प्रयाति करुणार्द्रताम् ।
चिन्तयत्यप्रियं प्राज्ञो मनसापि न कस्यचित् ॥४१॥
प्रभूतस्यापि कोपस्य वशं याति न जातुचित् ।
उदासीनवदध्यास्ते स्वजनोपार्जितं गृहम् ॥४२॥
उच्चाटित इवोद्भ्रान्त इवापगतधीरिव ।
अपकृत्येष्ववद्येषु न कदाचित् प्रवर्तते ॥४३॥
सच्छास्त्रश्रवणोद्भूतप्रबोधाविशदाशयः ।
बुद्ध्वावबुध्यते पश्यन्सदसद्वस्तुनिश्चयम् ॥४४॥
दुःखैकायतने निन्द्ये मायाक्षणभङ्गुरे ।
जन्ममृत्युजराग्रस्ते हर्षशोकभयाकुले ॥४५॥
संयोगविप्रयोगाङ्के रागद्वेषकदर्थिते ।
क्षुत्पिपासापरिक्षीणे कामक्रोधोपतापिते ॥४६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विकल्पकल्पनाजालकलिते मालिने जडे ।
मानावमाननाम्लाने शङ्काशङ्कुशताचिते ॥ ४७॥
आश्वासपाशैकाविरते ततोऽसौ पाञ्चभौतिके ।
निरूपोपमताहेमशरीरे वीचिकिल्बिते ॥ ४८॥
लोकभुते नानुभूते कुमार्या(:) सुरते यथा ।
तथास्य स्वात्मसत्तायां प्रतीतिरूपजायते ॥ ४९॥
अन्यैव सहजोदारश्चिच्चमत्कारसुन्दरः ।
अतिपल्लवितसच्छक्तिप्रसर पौरमेश्वरः ॥ ५०॥
स्फुरच्चराचरस्फारनानाकारपरिग्रहः ।
परमात्मा निराकारो निर्विकारः परात्परः ॥ ५१॥
अन्तः स सरसीभूतनिर्विभागानिजाद्यिपातिः ।
प्रतिमादर्शसंक्रान्तावीचित्रमुवनत्रयः ॥ ५२॥
परामृतरसास्वादनिर्भरानन्दसंकरः ।
निराकारोऽखिलाकारचरणैकान्ततत्परः ॥ ५३॥
कवलीकृतदिग्देशकालाकारादिकल्पनः ।
सर्वतः प्रसरत्स्फारस्वभावभरभास्वरः ॥ ५४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनादिरव्ययो व्यापी कलनातीतगोचरः ।
निर्विकल्पो निराभासो निष्प्रपञ्चो निरञ्जनः ॥५५॥
निर्गुणो निष्क्रियः शान्तो निरातङ्को निरामयः ।
निरुत्तरो निरुच्चारो निराचारो निरन्तरः ॥५६॥
निःसंशयो निस्तरङ्गो निरौपम्यो निराश्रयः ।
नित्यो निराशो निर्नामा निराह्वानविसर्जनः ॥५७॥
स्वसंवेदनसंवेद्यः सदसद्भाववर्जितः ।
स्वप्रकाशः पराकाशः प्रशान्तविशदाशयः ॥५८॥
अनादित्वात् पुराणोऽयमजडत्वादवीश्वरः ।
भासकः स्वप्रकाशत्वाद् व्यापकत्वाच्च सर्वगः ॥५९॥
स्वतन्त्रो निरपेक्षत्वाच्छक्तिमत्त्वात्परेश्वरः ।
निष्क्रियः कृतकृत्यत्वादचिन्त्यत्वाद् दुरासदः ॥६०॥
निस्पृहः परिपूर्णत्वादजडत्वात् प्रबोधकः ।
निर्विकल्पोऽमनस्कत्वादमूर्तत्वान्निरामयः ॥६१॥
निराभासः प्रशान्तत्वात् सूक्ष्मत्वात् कलनोज्झितः ।
सर्वानुग्रहधर्मित्वात् परोऽप्यपररूपधृत ॥६२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनारभ्यो वागतीतत्वात् स्वतन्त्र(त्वा)दपाश्रितः ।
दुर्विज्ञेयो रहस्यत्वाद्धृदयस्थोऽपि दूरगः ॥ ६३॥
अशक्यत्वादुदासीनो निर्मलत्वादनावृतः ।
निष्कामत्वादसङ्कल्पो नित्यसत्त्वादसंशयः ॥ ६४॥
अद्वयो विश्वरूपत्वादनन्तत्वात्तथाऽव्ययः ।
प्रमाणैरपरिच्छिन्नः स्वातिक्रान्त्वात्तथा विभुः ॥ ६५॥
एवंरूपोऽपरिज्ञानाद् बन्धदो मोक्षदोऽन्यथा ।
परमात्मेति तत्त्वज्ञैर्मतते ततोऽनुकः ॥ ६६॥
विकल्पजालनिर्मुक्तो वैराग्यः शुद्धवासनः * ।
ततः सद्गुरुणादृस्य स्फुरद्ब्रह्मैकलक्षणः ॥ ६७॥
दृग्गावलोकितः सद्यः स्वसत्तामवगाहते ।
दीपसंदीप्तो यथा स्वे स्वं पश्यतीव प्रभा ययः ॥ ६८॥
तदैतदेकतां याति ब्रह्मणा ब्रह्मसंगतम् ।
तत्स्वरूपानुप्रविष्टोऽसावानन्दैकघनः क्षणम् ॥ ६९॥
देहभावं समुत्सृज्य किञ्चिदेवावशिष्यते ।
लोपायोपेयभावोऽत्र न भावो न च भावना ॥ ७०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नोदयास्तमये यत्र याति तस्मिन् विलीयते ।
उन्मेषः प्रथमो यस्मान्नित्यो यस्मात् प्रशाम्यति ॥७१॥
तस्मिन् सामरसीभावं प्रत्यास्वाद्यान्यधीर्नरः ।
अनुभूतापि या व्यक्तं गिरा वक्तुं न युज्यते ॥७२॥
तां कामप्यात्मसंवेद्यां भजते चिच्चमत्कृतिम् ।
यत्र स्थितो न निर्वेदमुपयाति कदाचन ॥७३॥
प्रलीनकालकलनस्तन्मयत्वं प्रपद्यते ।
गुरुशास्त्रानुभवजैर्निश्चितं प्रत्ययैस्त्रिभिः ॥७४॥
परिज्ञायात्मनात्मानं जीवन्मुक्तो विजृम्भते ।
न मे बन्धो न मे मोक्षः स्वस्वरूपस्य विद्यते ॥७५॥
परादपरतामेत्य यथापि च पुनः पुनः ।
सुखदुःखैकसदनं शरीरं पाञ्चभौतिकम् ॥७६॥
जायते कर्मसंयोगात् पुनरेव विनश्यति ।
शरीराद्व्यतिरिक्तोऽयमात्मा येनोपलभ्यते ॥७७॥
तज्ज्ञानमदसान्निध्यमज्ञानं यदतोऽन्यथा ।
यथा तु गुरुणा सम्यगाविर्भावितलक्षणः ॥७८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संकोचः क्रियते दूरं तदाद्यास्यं(न्यं) प्रकाश्यते ।
सोऽयमात्माऽपरिज्ञानबाधितात्रोजसंशयः ॥७९॥
शरीरस्थोऽपि तद्धर्मैर्न लिप्येत् कर्मभोगजैः ।
रागादिरूपरागो मे शुद्धस्य स्फटिकादिवत् ॥८०॥
सक्तश्च व्यतिरिक्तश्च शरीरेऽहं जलार्कवत् ।
मध्यन्ताऽखिलं विश्वमण्डोदरमयूरवत् ॥८१॥
देहस्थितोऽप्यमलस्थोऽहं कुसुमाद्यधिवासवत् ।
विश्वव्यापी न मायावदमूर्तो नाम्बरादिवत् ॥८२॥
स्वप्रकाशो न मणिवत् कर्ता नो कुम्भकारवत् ।
स्वसंवेद्यो न पुरुषवत् सूक्ष्मो न परमाणुवत् ॥८३॥
वीतरागो न मुनिवत् साक्षयो नेन्द्रजालवत् ।
मुनिभिर्नियमक्षीणैस्तपस्वाढ्यैः परंतपः ॥८४॥
आवेदान्तरहस्योऽयं कल्पकोटिशतैरपि ।
अयमेव सदा साङ्गैः स्तूयते स्तुतिविस्तरैः ॥८५॥
मार्गैरनेकैर्विद्वद्भिरयमेवोपगम्यते ।
अज्ञानान्धतमश्छन्नदृग्भिर्मायामलीमसैः ॥८६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हृदयस्थोऽप्ययं कैश्चित् क्वचिदन्यत्र मृग्यते ।
उक्तिप्रपञ्चैर्विविधैर्मोहोपहतबुद्धिभिः ॥८७॥
हेतुवादैकनिष्ठत्वादयमेव विकल्प्यते ।
आत्मा न कश्चिदेवात्र परमार्थेन विद्यते ॥८८॥
विकारो भूतसंयोगाज्जायते चेतनाह्वयः ।
भूतात्मके शरीरेऽस्मिन् यातेऽकस्मात् प्रलीनताम् ॥८९॥
ततो न कश्चिदायातं चार्वाकाः प्रतिपेदिरे ।
गुणात्मिकेयं प्रकृति पुरुषस्तु गुणोज्झितः ॥९०॥
तयोः पृथक्पृथक्कोऽयं मोक्षोऽस्माविति कापिलाः ।
क्षणिकज्ञानसन्तानवादिनः सौगताश्च ये ॥९१॥
आत्मा न कश्चिदस्तीति जगुस्ते शून्यबुद्धयः ।
कर्तृप्रयोजितान्येव चेष्टन्ते करणानि यत् ॥९२॥
अतः प्रयोजकस्तेषां कश्चिदात्माऽनुमीयते ।
समुच्यते तु सहजैर्यद्वा तु नवभिर्गुणैः ॥९३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदेवमुक्तिरित्यस्मिन् पक्षे नैयायिकाः स्थिताः ।
अर्हताश्च प्रत्यभिज्ञाज्ञैः सर्वोपाधितिरस्कृतः ॥९४॥
शुभाशुभैकफलभुक् प्रोक्तो मीमांसकैरयम् ।
इत्येवमाद्यस्तत्तर्कभिन्नप्रमितिभिः सदा ॥९५॥
वादिभिः स्वप्रमाणैः कामिज्ञोऽप्येष प्रतीयते ।
सर्वाहम्भावसम्पूर्णो बोध्य कश्चिन्महेश्वरः ॥९६॥
यदि न स्यान्मते तस्ये प्रामाण्यं स्थापयेत कः ।
विपर्योऽनुभवो भ्रान्तिरहन्ताविस्मृतस्मृतिः ॥९७॥
पूर्वापरानुसन्धानं कस्य स्यादीश्वरं विना ।
तस्मादनादिसंसिद्धो विश्वशक्त्युपबृंहितः ॥९८॥
केन शक्यो निराकर्तुं विभुः स्वप्रसरोदयः ।
विकल्पं(ल्प) निवहत्यागात् सर्वाहम्भावभावनात् ॥९९॥
स्वानुभूत्येकशीलत्वात् प्राप्यते परमं पदम् ।
परानन्दैकविश्रामान्मध्यमार्गावलम्बनात् ॥१००॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्ववस्तुपसंहारात् प्रत्यात्मोपलभ्यते ।
इत्याशाशीवसद्भावपरस्याचार्यस्य सूनुना ।
शतकं सिल्हणेनेदं कृतं स्वात्मोपलब्धये ॥१०१॥
इत्याशाशीवसद्भावः कश्चित् सिद्धपुरुषोदितः ।
लोकानुकम्पया चक्रे विमर्शेदं प्रत्यात्मनः ॥१०२॥

" इत्याचार्य सिल्हणकृतं स्वात्मोपलब्धिशतकं समाप्तम् "

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अभिनवगुप्त विरचिता
पर्यन्तपञ्चाशिका

—×××××—

आद्यन्तान्तर्गतानन्तशक्तिविश्रान्तिनिर्भरम् ।
अनुच्चार्यमहं वाचमध्यीये हृदयं विभोः ॥१॥
स एव भैरवो देवस्सर्वे देवाश्च यन्मयाः ।
सैवासौ भैरवी सत्ता असत्तापि च यन्मयी ॥२॥
तदेव भैरवं ज्ञानमज्ञानमपि यन्मयम् ।
स हि भैरवसिद्धान्तः पूर्वपक्षोऽपि यन्मयः ॥३॥
ऐकध्यमध्वनां षण्णां यत्र सा भैरवी स्थितिः ।
पर्यन्ते सर्वतन्त्राणामवाच्या परमा गतिः ॥४॥
सा चिदानन्दमात्रात्ममग्नेच्छाज्ञानसत्क्रिया ।
हृदयं देवदेवस्य भैरवस्याविभागभूः ॥५॥
चित्स्वाभाव्यादसौ देवः स्वात्मना विमृशन् प्रभुः ।
अनाश्रितादिभूम्यन्ता भूमिकाः प्रतिपद्यते ॥६॥
तत्र वाचकवाच्यात्मस्पन्दयोरेकशः प्रभोः ।
स्थूलसूक्ष्मपराभासक्रमयोः षड्विधाध्वता ॥७॥
क्रमो यो देशकालात्मा [illegible] संविदाम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

विच्छेदादेश्च विज्ञानुविचिन्त्याभासताकृत

उभयो तत्र वै रीतिः शुद्धाशुद्धात्मभेदतः ।

शुद्धिर्बहिष्कृतार्थानां स्वान्तायां निमज्जनम्

अशुद्धिरपि मग्नानां नैवं हृदयविस्रमः ।

अत्रान्तरेऽप्यनन्तास्स्युः स्थितयस्तारतम्यतः ॥१०॥

उचितोचितमेयानां प्रमातॄणां प्रकाशने ।

साधारणान्यथाभावौ मिथेते मातृमेययोः ॥११॥

अविकल्पस्फुटाभासा सा सृष्टिः शाम्भवी मता ।

अभेदेनात्मनिर्माणे स्वात्मैव करणीकृतः ॥१२॥

क्रियाज्ञानात्मचिच्छक्तिर्भेदासूचणकारणात् ।

कलाविद्यापदं प्राप्य भेदाभेदे पुनर्भवेत् ॥१३॥

प्रमाणबुद्धिप्रका या त्क्रियाया विकल्पनाः ।

सैव विच्छिन्नविच्छिन्न क्रिया ज्ञानोचमा यदा ॥१४॥

द्वयक्ष — कर्मेन्दु[illegible]तां प्राप्ता तदा सो पृथुरुच्यते ।

इतीच्छया स भगवान् भैरवः परिमीयते ॥१५॥

॥८॥ मितवृत्तिस्सती सा च शक्तिस्तमनुवर्तते ।
तस्य वियेश-सादाख्य-शिवतास्संकुचास्थितेः ।
॥९॥ देह-प्राण-बुद्धि-शून्य-प्रमातृत्वमुपागमन् ॥१६॥
तस्यासाधारणी सृष्टिस्तत्तन्नानाविकल्पना ।
शैवसर्गोत्थसंस्कारसंस्कृतस्य तदाश्रया ॥१७॥
प्रमातैवायमेतावत्प्रकारोऽवग्रहोत्सवे ।
अव्ययो वर्तते स्वात्मन्याविकल्पे चिदात्मके ॥१८॥
वत्स पश्य त्वमेवैतद् अद्वयत्वेन संविदः ।
विदितं तन्मयं विश्वमन्यच्चुच्छमसच्चतः ॥१९॥
किमुपायमिदं तत्त्वं यतोऽन्यन्नैव संभवि ।
अनन्योपायमेतत्तदात्मोपायं प्रचक्षते ॥२०॥
संहृत्य सर्वतश्चिन्तास् (अह)मित्यनुशीलयम् ।
अविकल्पां स्वसंवित्तिं प्रत्यक्षां प्रतिपद्यते ॥२१॥
अनन्तैतावदाकारस्वीकारेऽप्येकलक्षणाम् ।
तां स्वसंविदमाविश्य विकल्पान्न विकल्पयेत् ॥२२॥

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

खेचर्यादिचतुस्स्रोतो वाहपूर्णां महाह्रदम् ।
व्योमेश्वरीमात्मचितिं विगाह्य श्रीडियेज्जडम् ॥२३॥
सर्गस्थापनसंहारनिग्रहानुग्रहक्रमात् ।
पञ्चकृत्यानि कुर्वाणः शिवोऽहमिति विश्वसेत् ॥२४॥
क्षेपज्ञानप्रसंख्या(नं)(ग)तिनादक्रमेण वा ।
गुरुवक्त्रेण तान्यात्मन्याकलय्य कृती भवेत् ॥२५॥
विकल्पयित्वा विश्वात्मा भैरवोऽहं ममैव ताः ।
विश्वभङ्ग्यो यथा वह्नेर्ज्वालाभङ्ग्यः प्रभास्वेः ॥
एकोऽहं मातृविज्ञानमानमेयप्रकारवान् ।
शुद्धबोधादिरूपेण खेचर्यादिचतुर्दश ॥
भेदाभेदप्रकारेण बन्धमोक्षौ विभावयन् ।
भैरवोऽस्मीति विस्रम्भात् स्वाच्छन्द्यं परमं व्रजेत् ।
अन्तःकारबहिष्कारावकालक्रममात्मनः ।
अपरत्चीनमाधत्से यत्त्वं प्राभवनिर्भरः ॥२६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनुत्तरविसर्गात्म विश्वोदययामलम् ।
संघट्टः शिवशक्त्योस्तदन्तरे चान्यशक्तयः ॥३०॥
आनन्देच्छे शमोन्मेषा ऊनता चेशनेच्छयोः
अस्फुटस्फुटभेदेन वेद्योल्लासस्तयोर्विदः ॥ ॥३१॥
आनन्दानुत्तराभ्यां च सन्धिभावोऽथ वेदना
वेद्यानां प्राणभूतेति पूर्णं तद्भैरवं वपुः ॥३२॥
वेद्योल्लासोऽयमिच्छायामीशने चैकतः स्थितः ॥
स्थूलत्वेन पृथिव्यादिभूतपञ्चकतामियात् ॥३३॥
सूक्ष्मत्वेन च गन्धादिपञ्चतन्मात्रतां ततः ॥
करणत्वेन संस्पर्शादीन्द्रियाणां द्विपञ्चताम् ॥३४॥
वेद्यताया छादनेन वेत्तृतोद्भासनक्रमे ।
V२६→२६॥ मनोऽहं बुद्धिताम् एषाम विभागे प्रधानताम्
पुरुषत्वं च संकोचविकासौ यदपेक्षया ॥३५॥
अभूवन्नित्यसंयोगाद् द्विरूपादुभयात्मनः ।
इच्छास्वरूपादुन्मेषादन्यथानुत्तरायुताते ॥३६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतस्त्रश्शक्तयोऽन्तस्था पुंसोऽस्यान्तश्च धारिकाः
चिद्व्योम्नो जडभूमेश्च मायामय्यास्त्रिशङ्कु-
वत् ।३७॥

इच्छाशक्तेरग्निरूपाया गतिस्त्रोऽन्याश्शक्तयोऽभ-
वन् ।
विसर्गोऽयमथात्यर्थं स्फुटोऽभूत् सृज्यविस्तरात्
॥३८॥
एतत्सर्वं ब्रह्मशक्तीनामितरेतरमिश्रणात् ।
भवेत्क्षोभान्तरं नास्याद् विसर्गाद् बाह्यतो
भवेत् ।३९

इयत्सर्वं सदिच्छादि द्वारेणुत्तरभैरवे ।
विश्रभ्य विश्रभ्य मुहुस्तत एव विसृज्यते ॥४०॥
अन्तर्लीनानन्तार्थस्वात्मामर्शश्चितिः परा ।
एकवाग्विहाद येयं मन्त्री वाक् शुद्धकर्तृता ॥४१॥
त्रिवर्त्मं त्रिपथं त्रिस्पृष्टं कालं सा कर्षति स्वतः ।
बहिस्तत इत्यात्मनीति श्रीपरा कालकर्षिणी ।४२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भेदितान्तः कृताखण्डभा वावेक्षा परापरा।
कर्तृता सैव पश्यन्ती तस्यैवेशदशाश्रया ॥४३॥
मध्यमा सक्रमा स्थूला अन्तःकरणवर्तिनी।
विकल्पमात्रभिन्नवाच्या प्राणवृत्तिविभेदिता ॥४४॥
स्ववासनातादवस्थ्याद् दशयोः पूर्वयोरपि।
माया मातुर्मितत्वं स्यात् पश्यन्त्याश्च क्रमो ह्यणुः ॥४५॥
तयोराविश्य दशयोः क्रमाच्छान्तविकल्पयोः।
चन्यस्स्वसंविद्विस्तारं साश्चर्यमनुपश्यति ॥४६॥
सा स्थानकरणाघातपुंव्यापारात्मिका सती।
वैखरी वृत्तयो यस्यास्ता इमाः श्रुतिगोचराः ॥४७॥
आभिः परस्परं ज्ञानसंक्रान्त्यात्मा स लौकिकः॥
व्यवहारोऽथ शास्त्रीयो नानासंकोचसंकटः ॥४८॥
इति वाग्व्याप्तिविद्वांसमेतद्वाग्विदेवताः॥
माहेश्वरीमुखा देव्यो जागरेऽपि न मुञ्जते ॥४९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपायैर्गोणहः कापि उपेया भैरवी स्थितिः।
यासौ स्व संवित् तामेव सर्वोपायैः समाविशेत्॥
आद्यन्तान्तर्गतानन्त वाच्यवाचक निर्भरम्।
रहस्यं मन्त्र मुद्राणां प्रपद्येऽनुत्तरं महः॥ ५१॥
शम्भोरभिन्न रूपया जयन्ति गुरवः पुरा।
निर्व्युत्थान समाधान प्राप्त पर्यन्त संविदः(

॥ परिपूर्णा कृतिरियं श्रीमदाचार्याभिनव गुप्तपादस्य पर्यन्त पञ्चाशिका नाम ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

५० ॥

संपदः)
(५२)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपायैर्नाग्रहः कार्य उपेया भैरवी स्थितिः॥
यासौ स्वसंवित् तामेव सर्वोपायांसमाविशेत्।
॥५०॥
आद्यन्तान्तर्गतानन्तवाच्यवाचकनिर्भरम्।
रहस्यं मन्त्रमुद्राणां प्रपद्येऽनुत्तरं महः॥
॥५१॥
शम्भोरभिन्नहृदया जयन्ति गुरवः पुरा।
निर्व्युत्थानसमाधानप्राप्तपर्यन्तसंविदः॥
(संपदः)॥५२॥

परिपूर्णा कृतिरियं श्रीमदाचार्याभिनवगुप्तनाथस्य पर्यन्तपञ्चाशिका नाम॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

... पुरातत्त्व विभाग
... पाण्डुलेखालय
१०२४

ॐ नमो गणपतये

निःशामानन्द या देव्या नित्यं समरसात्मनः ।
परमस्य शिवस्याहं श्रये श्रीपादुकाद्वयं ॥
सर्व्वान्न ग्राहिणी नित्यां सर्वमंगलभाजनं ।
सर्वशक्तिम्भजे शक्तिं पञ्चकृत्य करी प्रभोः ॥
पालितं वहिरिन्द्राद्यैः परमैश्वर्य शोभितं ।
प्रपद्ये पश्चिमद्वारं मृडान्या मंदिरम्महत् ॥
पाशांकुश हलां भोज पाणि पादनु नंदितं ।
वारं विघ्नच्छिदं वन्दे गजवक्त्रं गणेश्वरं ॥
कपाल शूलौ बिभ्राण कृपालु कृष्ण विग्रहं ।
त्रीक्ष्णं तीक्ष्णमर्च्चामि क्षेत्रेशं क्षतविद्विषं ॥
वराभय धरौ धीरौ विश्वसंकल्पकल्पकौ ।
शंखपद्मासन गतौ शंख पद्म निधी श्रये ॥
पद्मद्वय वराभीति भास्वत्पाणि चतुष्टयं ।
पद्मवल्ली भजे पद्मा पद्माक्षा पद्मवासिनीं ॥
शंखचक्राङ्कितकरा कुमारी कुटिलालका ।
मृगेन्द्रवाहना देवी दुर्गा दुर्गाणि हन्तु मे ॥
अक्षस्रक् पुस्तकधरा पूर्ण्णचंद्रामलद्युतिः ।
विश्वविद्यामयी देवी भारती भासतां मयि ॥
पलाल पटलच्छायं रमणीयं रतिप्रियं ।
पुर्ण्णेषु चाप पुष्पेषु मत्तं वन्दे मनोभवं ॥
प्रपद्ये प्रीति दयितं पूर्ण्णेन्दुरि वेष्टितं ।
आश्रयं शक्ति चक्रस्य श्रीचक्र चिन्तये श्रिये ॥
चिन्तारत्नोभयकरा चन्द्रोन्तसा स्त्रिलोचना: ।
अनिमादि महासिद्धी ररुणाः सिद्धये श्रये ॥
बशीदल श्यामलाङ्गीः कपालोत्पल धारिणीः ।
ब्रह्माण्यादि भजे मातृ वन्धूक रुचिराम्बराः ॥
दत्ता पाशाङ्कुश धराः स्वस्वमुद्रा वधो दिनः ।
अनुगृह्णन्तमे भीष्ट मुद्रा दशक देवताः ॥
रक्ताः पाशांकुश धराः कला नित्या कलानिधिः ।
आकर्षन्त ममाभीष्टं षोडशाकृष्टि शक्तयः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुरातत्व विभाग
२०२४

अरुणा करुणा वृत्ति दैव्याच्छाया इवोदिता ।
अनङ्गशक्तिरष्टौस्ता पूजयामि सुडुर्ज्जया ॥
सर्व्वसंक्षोभणी पूर्वाः शोणो वाण धनुर्धरा ।
वन्त दश भजे शक्ति चतुर्द्दश जगन्नुता ॥
शुभावराभय भूतो वन्दे विश्व कुलेश्वरी ।
सर्व्वसिद्धि प्रदश्चास्ता वहिर्दशक देवता ॥
अक्षस्त्रक् पुस्तक धराः कर्पूर रुचिराकृतीः ।
अन्तर्दशकदेवी स्ताः सर्व्वज्ञाद्याः समाश्रये ॥
चापेषु पुस्तकाक्षस्त्रक् चारुपाणि चतुष्टयाः ।
रक्ता वागीश्वरी वन्दे वसिन्याद्यष्टदेवताः ॥
रक्ताः वराभय भूतः सुरूपाङ्कित मस्तकाः ।
चतस्त्रोमे दिशं ज्ञात्वा मिष्टाद्यायध देवताः ॥
पाशाङ्कुशा भूत कपाल वराभयाङ्के हस्ते चतुर्भिरभिराम भृशारुणाङ्गी ।
कोणाग्रगा त्रिनयना तरुणेन्दु चूडा कामेश्वरीमम ददान्त समस्तकामान्
वालप्रवाल रुचिराकर षद्क सद्धि चापेषु पाशश्रणिपाल कमानतलङ्गा ।
वज्रेश्वरी प्रथित दक्षिण कोण वामा वज्रोज्वला विदिशतां मम वाञ्छितानि ॥
अक्षाशशाङ्क रुचिराश्रित वानकोपाशाङ्कुशेक्षु गुण पुस्तक शस्त्रहस्ता ।
उद्भावयत्वनिशन भूत भूरिशक्ति भाग्यश्रियम्भगवता भगमालिनी मे ॥
सूर्येन्दुवह्निमय भासुर पीठरोहं स्वच्छागृहीत शशिपाशशरेषु चापः ।
वातेन्दुमौलिमलकाग्रललामनेत्रा नित्यान्नमामि महतीयमूर्त्ति ॥
सिन्दूर सुन्दर तनु तनुमध्यभागा कान्तिश्रियः कलभवक्त्र च कम्भनम्रां ।
चन्द्राननाञ्चलकरङ्ग निभायमाक्षीं मन्दस्मिताम्मदन मङ्गल वेजयन्ती ॥
काञ्चीचिणीकण्ठकलुलहार वल्लीं काञ्चीकालापमणिनूपुर मण्डिताङ्गी ।
वन्धूक वन्धुवसनां वहलानुरागा कास्मीरचन्दनसमुल्लसिताङ्गरागां ॥
मुक्तावितानमहिते मणिविष्टराग्रे पर्यङ्कपर्यरुचिरे सुवसोपविष्टां ।
पर्यङ्कपङ्कजमुखी धृतचामराला हसि विलंघित लसद्वदनारविन्दीं ॥
आरावनम्र विवुधेन्द्रवधू समूह श्रीमनरत्नरुचिरञ्जित पादपीठां ।
लालङ्विशालनयनाञ्चलकेलिकॢप्त स्वाराज्य विभ्रमण नादि वरप्रदानां ॥
आनन्द सान्द्र परमेध मदीप्यमान स्वच्छन्द सस्फुरदमन्द तरत प्रकाशां ।
देवीदयार्द्र हृदयां हृदय रहस्य श्रीसुन्दरीं शिवकरीं शरणं श्रयामि ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वान्देवि देवमहिषीमविभागभोगां भोगापवर्गफलदाम्भुवनेशि धाराः ।
शिवाधिभम्यवधि षट्गुणितात्मषट्क वैचित्र्यचित्ररचवोद्भवभिवमार्याः ॥
आधारवारिरुहषट्कविकाशसौम्ये सौष्यम्नवर्त्मनि सुधांशुरसान् श्रवन्तीं ।
आनन्दे तास्त्रिभुवनामरुणारुणाङ्गी माद्यमहस्त्वमनसापि वापि ॥
एकैकवत्यसि नवासि दशासि देवि भूयो दशासि पुनरेव चतुर्द्दशासि ।
इत्थन्त्रिकाधिकदशाङ्कितपद्मपाके शक्त्यार्ण्णवे वससि शर्मकरीकवानां ॥
लक्ष्मीः परां प्रकृतिमन्त्रजगत्यशिष मेकातपत्रधरचामरभारुचिह्नां ।
मातः र्म्महेश्वरि यशस्कृतमाद्यशक्तिं म्प्राहुः परापरदृशम्परमेश्वरीन्त्वां ॥
श्रीस्त्वं श्रियस्त्वयि शिरस्त्वयि गीस्त्वमाज्ञा धीस्त्वं धियस्त्वयि पुरस्त्वयि पुरा
माद्या ।
शक्तिपरा त्वमसि शक्तिगुणास्तवैते किं विस्तरेण ननु सर्वमिदं त्वमेव ।
त्वामावदन्ति मुनयस्तमसा निहन्त्री माह्लादिनीं स्मृतिमनाममृतन्दुहानां ॥
नित्यादिता मनुदितास्तमयप्रसङ्गीं मान्तश्वरीं शशिकलामकलङ्कशङ्कां ।
त्वत्तेजसा तपति देवि यति द्विनाना माप्यादयत्यपि करैरमृतं हिमांशुः ॥
प्राणातपन्त इति वायुवशान्छरारे त्वामन्तरेण नहि कस्य जनप्रवृत्तेः ।
वेदा विभिन्नगतयो विदुषः स्वतन्त्रा स्तन्त्राणि मन्त्रनिवहा महितप्रभावाः ॥
भावा विभक्तिविषयाः कविगुम्फनाश्च मातः परम्परि नमन्ति तवायुतांशान् ।
यस्ते विभूतिपरमप्रविलम्बितात्मा बुद्ध्या प्रमिच्छति पुमान पुरुषः प्रमायाः ॥
संस्पृश्यति स्फुटमसौ भुवनेपटीयान् च्छायां स्वकीयशिरसः स्वमदक्रमेन ।
अभ्यर्च्य देवि भवतीं त्विभवामि भूमि माम्नायदर्शितपथेन यथा कथञ्चित् ॥
वाचोस्तेरुधि च वा विधकन्यकाया वाल्लभ्यवर्त्मनि जनैर्न्नविगण्यते कः ।
साङ्गं समाहितधियो हृदयङ्गमानि र्गायन्ति सौरि मधुरास्तव कीर्त्तिगाथाः ॥
हाला सुगन्धि हरिचन्दनवाटिकासु विद्याधरा विबुधसिन्धुतटस्थलीषु ।
देवितदीयसहसा महिता महाम्भो भालाक्षणाः शशिभृतो भुजगेन्द्रभूषः ॥
सिद्धान्तसिद्धिपरमार्थविधिप्रसिद्धाः सिद्धाः सुधांशुवदनेऽसि वना व्रजन्ति ।
दृष्टिप्रसादल - लभव - त्तवाम्बमादो नमत्यमरराजगणोऽपि पुंसां ॥
प्रेत्चोलमौलिमणिमण्डितपादपीठाः सर्वे किमङ्ग चतुरब्धिवसुन्धरेन्द्राः ।
~~त्वाङ्क्षेदनीलेकलकण्ठविलोनी नि - नितित्येतिनित्यसिति गौरीति ना~~
त्वाङ्क्षेदनीलेकलकण्ठलिनि - ति नित्येति नित्यरिति गौरीति नाविकेति ॥
विद्येति संविदिति विश्वमयीत्युमेति कामेश्वरीति कमलेति वदान्त ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

- - - - र - लाकुलनाथकान्तां बालातुल्यमहसं वहुलभ्या ॥
आनन्दमूर्त्तिमखिलार्थविलासहेतु मायास्मरम्य विरत परमार्थविद्यां।
यः कामः सिद्धि - ते मङ्गलकामधेनुः कामेश्वरी स्तुतिमिमाम्पठति प्रतीतः
कान्त्याश्रिया कवितपागुणसम्पदा च सोयंस्वयं विवृतएव किमुप्रियाभिः
इति श्रीमहाराजाधिराज विद्याधर चक्रवर्त्ति वत्सराज विरचिता श्रीवा-
मकेश्वरी स्तुतिः समाप्ता ॥ ॥

राष्ट्रिय अभिलेखालय, राम शाह पथ काठमाडौंको।
नं: पु: १०८८ - को. वामकेश्वर स्तुति बाट प्रतिलिपि भएको।

... को सरकार
... पुरातत्त्व विभाग
राष्ट्रिय अभिलेखालय
१०२४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi